वर्षम् 74
अङ्कः -01
कार्तिकमासः
विक्रमाब्दः 2080
युगाब्दः 5125
नवम्बर , 2023

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | श्रुत-बोध-कथा | डॉ. नारायणकाङ्क्षरः | ८ |
| ३ | करग्रहलीला | डॉ. अञ्जना शर्मा | ९ |
| ४ | दर्शनानां लोकन्यायानाञ्च मूलभूता वेदभागाः | डॉ. के.मल्लिका | १३ |
| ५ | राष्ट्ररक्षणम् | प्रो.ताराशंकर शर्मा पाण्डेयः | २१ |
| ६ | चरित्रनिर्माणपूर्वकं व्यक्तित्वविकासः ..... | डॉ.रणजीतकुमारझाः | २२ |
| ७ | संस्कृतसमाचारः | सम्पादकः | २६ |
| ८ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २७ |
| ९ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १० | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर बनवारीलालगौडः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका:

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय, शिक्षा मंत्रालय, भारत सरकार के अधीन के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित है।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 74 अङ्कः -01
कार्तिकमासः
विक्रमाब्दः 2080
युगाब्दः 5125
नवम्बर, 2023

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# 'भारती' पत्रिकाया विकासयात्रा

...✍ प्रोफेसर श्रीकृष्णशर्मा

'भारती' संस्कृत-मास-पत्रिका 1950 ईशवीतोऽनवरतं प्रकाशमाना ऐषमो 'दीपावलि' पर्वणि चतुःसप्तति- (74) तमे वर्षे साफल्येन सम्प्रविशती मन्ये राष्ट्रे कीर्त्तिमानमधिगतवतीति मोमुदीति चेतः। '**भारती**' पत्रिका सम्पूर्णेऽपि भारतवर्षे **प्राचीनतमा** पत्रकारिता-क्षेत्रे महनीयं योगदानं प्रदत्तवती। एतदाकलय्य 11.08.2022 तमे दिनाङ्के नवदिल्लीस्थेन केन्द्रीयसंस्कृत-विश्वविद्यालयेन संस्कृतसप्ताहान्तर्गतकार्यक्रमेषु पत्रिकेयम् **एकलक्ष**रूप्यकराशिप्रदानपुरस्सरं **प्रशस्तिपत्रेण** आचार्य (डॉ.) श्रीनिवासबरखेडी (कुलपतिः), डॉ. सुभाष सरकार (केन्द्रसर्वकारस्य शिक्षाराज्यमन्त्री) महोदयानां करकमलैः सभाजिता। संक्षेपेणास्या विकासयात्राया वृत्तं प्रस्तूयते -

'भारती' संस्कृतमासपत्रिका **बाबासाहब-आप्टे**-महोदयानां सत्प्रेरणया 1950 तमे खिस्ताब्दे '**दीपावलि**' पर्व-दिनात् समारब्धाऽऽसीत्। आप्टे-महोदयाः श्रीमन्तं गिरिराजशास्त्रिणं **प्रथमप्रबन्धसम्पादकपदे** न्ययुञ्जत। जयपुरतः 'संस्कृतरत्नाकरः' इति नाम्ना मासपत्रिकायाः 1904 खिस्ताब्दतः प्रकाशनमारब्धमासीत्, 1949 ईशवीयाब्दे सा जयपुरतः काशीं प्रति स्थानान्तरिता जाता। सौभाग्यात् किञ्चित्कालानन्तरं तदानीं राष्ट्रियस्वयंसेवक-सङ्घस्य केन्द्रीयकार्यसमितेः प्रचारप्रमुखाः **श्रीउमाकान्त-केशव-आप्टे** (बाबा साहब-आप्टे) महोदयाः जयपुरमागच्छन्। यदा तेऽज्ञासिषुर्यदितः कापि संस्कृतपत्रिका न प्रकाश्यते, तदा तेऽवदन् यदितः 'संस्कृतमासपत्रिकाऽवश्यं प्रकाश्येत' इति ममाभिलाषः। एतदर्थं जयपुरस्थ-महाराज- संस्कृत-महाविद्यालयीय-**म.म.गिरिधरशर्माचतुर्वेद-भट्ट-मथुरानाथशास्त्रिप्रमुखानां** विदुषाम् उपवेशन-मायोजितम्, यत्र प्रान्तप्रचारकं **श्रीलेखराजशर्माणं** संस्कृतमास-पत्रिकाप्रकाशनाय 'आप्टे' महोदयाः समादिष्टवन्तः। तत्रैवोपविष्टाः श्रीमन्तो **गिरिराजशास्त्रिणः** (दादाभाई) परस्पर-विचारविमर्शानन्तरं 'संस्कृपत्रिका'प्रकाशनाय दृढप्रतिज्ञा अभूवन्।

**श्रीगिरिराजशास्त्री 'दादाभाई' ( 1921-2012 ई. )**

- 'आप्टे' महोदया गिरिराजशास्त्रिवर्याणां कर्मठतामाकलय्य तान् संस्कृतमासपत्रिकायाः '**प्रबन्धसम्पादक**' इति पदे न्ययुञ्जत। श्रीगिरिराज-शास्त्रिणः संस्कृतमासपत्रिकाया नामकरणार्थं महाराजसंस्कृतमहाविद्यालयस्य तदानीन्तनैः प्राचार्यवर्यैः मीमांसा-केसरिभिः पण्डित-**पट्टाभिरामशास्त्रिभिः** सह परामर्शं विधाय 'सञ्जीवनी' 'भारती' वेति नामद्वयं पञ्जीकरणाय केन्द्रसर्वकाराय प्रार्थनापत्रं प्रेषितवन्तः। पञ्जीकरणकार्यालयतो '**भारती**' इति पत्रिकाभिधानम् अनुमोदितम्। इत्थं पञ्चाशदधिकैकोनविंशतिशततमे (1950) खिष्टाब्दे 'भारती' ति नाम्ना संस्कृतमास-पत्रिका पञ्जीकृता। ततः 1950 तमस्येशवीयवर्षस्य **दीपावलिदिवसाद्** 'भारती' नाम्ना संस्कृतमासपत्रिका समारब्धा। श्रीगिरिराजशास्त्रिणां सम्पादकत्वे प्रगतिपथ-मारूढा निर्बाधं प्रचलन्ती सम्प्रति श्री-सुदामाशर्मणां प्रबन्धसम्पादकत्वे त्रि-सप्ततितम (73) वर्षाणां यात्रां कृतवती।

**श्री-सुदामा शर्मा -**

'दादाभाई' श्रीगिरिराजशास्त्रिणां विश्रमानन्तरं 2010 ईशवीयाब्दतो राष्ट्रीयस्वयंसेवक-संघस्य वरिष्ठः प्रचारकः श्री-सुदामा शर्मा महोदयः प्रचारककार्येण सह 'भारती' ति संस्कृतमासपत्रिकाया प्रकाशनाय कटिबद्धः सर्वात्मना प्रयतते। इदानीमस्य महोदयस्याथकप्रयासैरथ

विदुषः प्रति निष्ठापूर्णव्यवहारेण च पत्रिकैषा निर्बाधगत्या प्रकाशतां याति। पत्रिकाप्रकाशनाय अर्थप्रबन्धस्य महती चिन्ता भवति-एतदर्थमेते महानुभावा अहर्निशं परस्परं परामृशन्ति प्रबन्धं च विदधति। सर्वेषामेते शीलभूषणाः समादरभाजः।

इदानीं यावद् अस्या 'भारती' संस्कृतमासपत्रिकाया विकासयात्रायां सम्पादकानां महद् योगदानमित्थं वर्तते –

**1. स्वामि-सुरजनदासः ( 1910-1990 ई. ) -**

'भारती' पत्रिकाया प्रथमसम्पादकोऽयं विद्वान् व्याकरण-साहित्य-सांख्ययोग-वेदान्तशास्त्रेषु लब्धाचार्यपदवीकः, संस्कृते 'एम.ए.' इति परीक्षायामपि लब्धस्वर्णपदकः, स्वामि-**मंगलदासानाम**न्तेवासी, जोधपुरविश्वविद्यालयस्य प्रथम-संस्कृत-विभागाध्यक्षचरः 1950 तः 1952 ईशवीयाब्दं यावद् वैदुष्योपेतं सम्पादनकर्म समाचरितवान्।

**2. पण्डित-वृद्धिचन्द्रशास्त्री ( 1904-1964 ई. )**

महामहोपाध्याय-गिरिधरशर्मचतुर्वेदानां शिष्यः, '**आदर्श-दम्पती**' त्युपन्यासस्य लेखकः, महाराज-संस्कृत-कॉलेजे धर्मशास्त्रविभागस्याचार्योऽध्यक्षचरः, 'संस्कृतरत्नाकर' इति प्रतिष्ठितसंस्कृतपत्रिकायाः सहसम्पादकचरो व्याकरण-धर्मशास्त्रयोर्लब्धप्रतिष्ठो मनीषिप्रवरो धर्मधुरीणः पण्डितवृद्धिचन्द्रशास्त्रिमहोदयः 1952 तः 1954 ई. पर्यन्तं 'भारती' पत्रिकां समपादयत्।

**3. भट्ट-मथुरानाथशास्त्री ( 1889-1964 ईशवीयाब्दः ) :**

'रसगङ्गाधर' नाम्नः काव्यशास्त्रीयग्रन्थस्य '**सरला**' टीकाकारः, **जयपुर-साहित्य-गोविन्दवैभवानां** प्रणेता, जयपुरस्थमहाराजसंस्कृतकॉलेजे साहित्यविभागाध्यक्षचरः, 'संस्कृतरत्नाकरपत्रिकायाः' ( 1904-1949 ई. ) कुशलः सम्पादकचरः 'भारती' मास-संस्कृत-पत्रिकायाः सम्पादकत्वं 1954 ई. वर्षत उररीकृत्य 1964 ई. वर्षं यावत् (निधनं यावत्) सम्पादनकार्यं निर्व्यूढवानयं कविशिरोमणिः भट्टमथुरानाथशास्त्रिमहोदयः।

**4. आशुकविः पण्डितहरिशास्त्री ( 1893-1970 )**

जयदेवमिश्रविरचित-'गीतगोविन्द' रचनामनुहरतः '**रामचन्द्रस्तवः**' इति काव्यस्य प्रणेता, साहित्यशास्त्र-पारावारपारीणः, साधनाप्रवीणो महाराज-संस्कृत-कॉलेजस्य साहित्यशास्त्रप्राध्यापको **महोपाध्याय** आशुकविवरेण्यः पण्डितहरिशास्त्रिमहोदयः 'भारती' पत्रिकामिमां 1964 तः 1969 ई. यावत् ( पञ्च वर्षाणि ) सम्पादितवान्।

**5. पण्डित-दीनानाथत्रिवेदी 'मधुपः' ( 1914 - 1982 )-**

महाराज-संस्कृत-महाविद्यालये न्यायशास्त्र-प्राध्यापकचरः, **सागरगर्वोक्ति**-दरिद्रतैकादश्यादि-हास्य-व्यङ्ग्योद्दीपकरचनाकारः, भारत्यां '**नारी-स्तम्भ**' लेखनसमारम्भकः, पण्डितप्रवरः श्रीदीनानाथ-त्रिवेदी 'मधुपः' मन्ये 1969 तः 1980 ईशवीयाब्दं यावत् 'भारतीपत्रिकाम्' समपादयत्।

**6. पण्डित-जगदीशशर्मा ( 1910 - 1997 ) -**

वीरेश्वरशास्त्रिद्राविडानां व्याकरण-न्याय-मीमांसा-धर्मशास्त्रेषु सच्छिष्योऽथ बिहारिलालशास्त्रिणां सन्निधे साहित्यशास्त्रेऽधिगतप्रावीण्यो जयपुरस्थ-महाराज-संस्कृतकॉलेजे साहित्यविभागस्याचार्योऽध्यक्षचरो **राष्ट्रपति-सम्मानितः** साहित्यशास्त्रस्य प्रौढो विद्वान् पण्डितजगदीशशर्मा 'भारती' पत्रिकायाः सम्पादनकार्यं अक्तूबर, 1980 ई. तः दिसम्बर, 1996 ई. यावत् निरवहत्।

**7. पण्डित-रामगोपालशास्त्री ( 1921 - 1992 ) -**

साहित्य-धर्मशास्त्राचार्यः, राजस्थानसंस्कृतशिक्षा-विभागे धर्मशास्त्रे प्राध्यापकः, राजस्थानसंस्कृतशिक्षा-निदेशालये उपनिरीक्षकपदे कार्यं निर्वहन्नसौ निम्बार्क-

सम्प्रदाये दीक्षितः पण्डितरामगोपालशास्त्रिमहोदयः 'भारती' पत्रिकायै पण्डितजगदीशशर्मणां प्रधान-सम्पाकत्वे सह-सम्पादकरूपेण नैकवर्षाणि सम्पादन-कार्यं निर्व्यूढवान्।

**8. देवर्षि-कलानाथशास्त्री -**

ब्रजभाषायाः कवित्त-सवैयाप्रभृतिवृत्तेषु संस्कृत-कवनेन नूतनसरणिप्रवर्त्तकस्य मञ्जुकवितानिकुञ्जकाव्य-मालाया प्रकाशकस्य कविशिरोमणेर्भट्टमथुरानाथ-शास्त्रिणस्तनूजो **विद्वज्जनचरितामृता**द्यनेकग्रन्थानां सर्जको भाषाविभागसंस्कृतशिक्षाविभागयोर्निदेशक-चरः, राजस्थानसंस्कृताकादम्या अध्यक्षचरो **राष्ट्रपति-सम्मानितो** देवर्षिकलानाथशास्त्री 1954 तः 1962 पर्यन्तं स्वपित्रा सह भारत्याः सहायकसम्पादनकार्यमि-दानीञ्च अष्टाशीतिवर्षदेशीयोऽपि निष्ठापूर्वकं 1997 ईशवीयाब्दतो निरन्तरं प्रधानसम्पादकरूपेण सम्पादन-कर्म निर्वहन्नसौ जयपत्तने चकास्ति।

**9. पण्डित-प्यारेमोहनशर्मा -**

राजस्थान-संस्कृत-शिक्षाविभागीयाचार्यसंस्कृत-महाविद्यालयेषु साहित्यशास्त्रे आचार्यप्राचार्यचरः, साहित्य-शास्त्रे नदीष्णानामाचार्य-**जगदीशशर्मणां** सच्छिष्यो राजस्थानसंस्कृताकादम्या **निदेशकचरः** पण्डित- प्यारेमोहनशर्मा 1997 खिष्टाब्दतः 2019 ईशवीयाब्दं यावद् (द्वाविंश वर्षाणि) 'भारती' पत्त्रिकायाः सम्पादनकार्यं कृतवान्। द्वि नवतिवर्षदेशीयोऽयं विद्वान् सम्प्रति भगवदाराधनैकव्रतो जयपत्तने चकास्ति।

**10. आचार्यः ( डॉ. ) श्रीकृष्णशर्मा -**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालयीय-संस्कृतविभागस्याचार्योऽध्यक्षचरः, पण्डित-मधुसूदन-ओझा-शोधप्रकोष्ठ-परामर्शदातृमण्डलस्याध्यक्षचरश्च, वाराणसीस्थकाशी-हिन्दू-विश्वविद्यालयीय-व्याकरणविभागे प्रगताचार्यचरः (Visiting Professor), जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृतविश्वविद्यालये म.म. गिरिधरशर्माचतुर्वेदी-व्याकरणपीठाध्यक्षचरः, **मैथिलपण्डितखड्गनाथ-मिश्राणामन्तेवासी,** 'वृत्तिमीमांसा'कारोऽधीत-व्याकरण-न्याय-साहित्यशास्त्रः '**स्वरमङ्गला**' त्रैमासिक-संस्कृत-शोध-पत्रिकाया (PEER REVIEWD RESEARCH JOURNAL) अपि सम्पादकः प्रोफेसर-श्रीकृष्णशर्मा सम्प्रति (नवम्बर, 2019 ई. तः) 'भारती' संस्कृतमास-पत्रिकायाः सम्पादनं विदधाति।

अस्याः 'भारती' पत्रिकायाः **सह/सहायक-सम्पादनकार्यं** कृतवन्तः कुर्वाणाश्च विद्वांसः सन्ति-

**पण्डितश्रीरामदवेः** (1922-2013 ई.)

'**भृत्याभरणम्**' इत्याद्यनेककाव्यग्रन्थानां प्रणेता, शाखाप्रबन्धकरूपेण बैंकसेवारतोऽपि संस्कृतस्य श्रेष्ठकविः, विश्वसंस्कृत-प्रतिष्ठानस्य प्रदेशसंघटनमन्त्री, राष्ट्रियस्वयंसेवकसंघस्य समर्पितसदस्यः, जोधपुर-वास्तव्यः पण्डितश्रीरामदवेमहोदयो भारत्याः द्विसहस्र-खिस्ताब्दतो नवम्बर, 2012 यावत् सहसम्पादक आसीद्।

**आचार्यः ( डॉ. ) हिन्दकेसरी ( 1947-2009 )-**

विद्वत्सु लब्धप्रतिष्ठो निविष्टवैयाकरणो राष्ट्रिय-संस्कृतसंस्थान-जयपुरपरिसरस्य **प्राचार्यचरो** विनम्रताया प्रतिमूर्तिः डॉ. हिन्दकेसरी-महोदयः 'भारती' पत्रिकायाः सह-सम्पादकरूपेण द्विसहस्रखिस्ताब्दतो जून, 2009 खिस्ताब्दं यावत् मनोयोगपूर्वकं समर्पितभावनया सम्पादनकर्म व्यधात्।

**पण्डितपद्मशास्त्री ( सन् 1935-2015 )**

'लेनिनामृतम्' 'पद्यपञ्चतन्त्रम्' 'वेदविज्ञानामृतम्' इत्याद्यनेककृतीनां सर्जको **राष्ट्रपतिसम्मानितः** श्रीपद्मादत्तशास्त्रिमहोदयः द्विसहस्रखिस्ताब्दतो नवम्बर, 2012 पर्यन्तं सुदीर्घकालं यावदस्यै 'भारती'

पत्रिकायै सह-सम्पादकरूपेण सेवां प्रदत्तवान्।

**डॉ. शिवचरणशर्मा** -

राजस्थानसंस्कृतशिक्षाविभागीय-राजकीय-वरिष्ठ उपाध्यायविद्यालये सम्प्रति प्रधानाचार्यः, संस्कृत-सम्भाषणे कुशलप्रशिक्षकः, बङ्कविवरेण्य-बंकिमचन्द्रचटर्जी-विरचित-'**आनन्दमठ**' इत्युपन्यासस्य संस्कृतेऽनुवादको डॉ. शिवचरणशर्मा ख्रीष्टाब्द-2012 तः जून, 2016 पर्यन्तं 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण कार्यं सम्पादितवान्।

**आचार्यः सुरेन्द्रकुमारशर्मा**

राजस्थानसंस्कृतशिक्षा**निदेशकचरः**, राजकीय महाराज-संस्कृत-कॉलेजस्य प्राचार्यचरः, साहित्य-शास्त्रस्य प्रौढो विद्वान् प्रोफेसर-सुरेन्द्रकुमारशर्मा 2012 ईशवीयाब्दतो 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण सपरिश्रमं कार्यं कुर्वन्नधुना जयपत्तने चकास्ति।

**पण्डित-शिवशरणनाथत्रिपाठी** -

साहित्य-व्याकरणशास्त्राचार्यः, अखिलभारतीय-संस्कृतसम्भाषणप्रतियोगितायां लब्धस्वर्णपदकः, समस्यापूर्तौ कुशलः, राजस्थानसंस्कृतशिक्षाविभागे **साहित्यशास्त्रव्याख्यातृचरः** श्रीशिव-शरणनाथत्रिपाठी 'भारती' पत्रिकायाः 2006 ई. तः 'सह-सम्पादक' कर्मणि संलग्नोऽस्ति।

**डॉ. स्नेहलताशर्मा** -

राजस्थानसंस्कृतविश्वविद्यालये सम्प्रति साहित्य-शास्त्रस्य सुयोग्या विनम्रा च विदुषी सहायकाचार्य-पदमलङ्कुर्वती 'भारती' पत्रिकायाः 'सहायक-सम्पादक'रूपेण नवम्बर, 2019 खिष्टाब्दतः सम्पादनकर्मणि साहाय्यं विदधाति।

**राजीवदाधीचः** -

'भारती' कार्यालये व्यवस्थापकपदे नियुक्तोऽत्यन्तं विनम्रः सन् 'भारती' पत्रिकाप्रकाशने विगतेभ्य त्रिंश (30) वर्षेभ्यः साहाय्यं विदधाति। एवमेव '**अविनाश आचार्यः**' अपि पत्रिकाप्रकाशनकर्मणि कार्यालये मनोयोगपूर्वं साहाय्यमाचरति।

पत्रिकाया द्वौ स्थायिस्तम्भौ वर्षेभ्यः प्रचलतः- 1. नारीस्तम्भः 2. आयुर्वेदस्तम्भः।

**1. नारीस्तम्भः**- अस्य लेखिका साधना-पुरस्काराद्यनेकपुरस्कारैस्सभाजिता, सोमनाथसंस्कृत-विश्वविद्यालय (गुजरात) द्वारा प्रदत्त-मानद'**डी.लिट्**' इत्युपाधिनाऽलंकृता, लालबहादुरशास्त्रिकालेजे संस्कृतविभागाध्यक्षचरा परम-वैयाकरण-डॉ. गङ्गाधरभट्टस्मृतौ '**राजगंगा ट्रस्ट**' इत्यस्य न्यासी डॉ. राजेश्वरीभट्ट-महोदया 1976 ईशवीयाब्दतः (47 वर्षेभ्यो) निरन्तरं 'भारती' पत्रिकायां सरलसंस्कृते नारीमहत्त्वप्रदर्शकं प्रेरणास्पदं हिन्दी-अनुवादसहितं यथाकालं लेखं लिखति।

**2. आयुर्वेदस्तम्भः** - जयपुरस्थ-राष्ट्रियायुर्वेद-संस्थानस्य निदेशकचरः, जोधपुरस्थ-राजस्थान आयुर्वेद-विश्वविद्यालयस्य कुलपतिचरः, **राष्ट्रपति-सम्मानितो** डॉ. बनवारीलालगौडमहोदयः प्राञ्जल-संस्कृतभाषायां हिन्द्यनुवादसहितां प्रतिमासमायुर्वेद-सम्मतां दिनचर्यां ऋतुचर्याञ्च 1986 ईशवीयाब्दतः (37 वर्षेभ्यः) निरन्तरम् आयुर्वेदस्तम्भरूपेण 'भारती' पत्रिकायां लिखति। सितम्बर, 2023 तः भारतीय-संस्कृतप्रचारसंस्थानस्याध्यक्षपदमप्यलङ्करोति।

दीपावलीपर्वणि समेषामभिनन्दनम्।

**- सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये संस्कृतविभागाध्यक्षचरः, जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।, दूरभाषाङ्काः: 8386943655

श्रुत-बोध-कथा -

# स्व-कथनस्य स्पष्टीकरणम्

❑ स्व. कोविद-कुल-किङ्करः **डॉ. नारायणकाङ्करः**
राष्ट्रपति-सम्मानितः

एकदा चत्वारः सुहृदः उपार्जितुं गच्छन्तः आसन्। ग्रीष्मस्य समयः आसीत्। मार्गे यदा पिपासा तान् बाधितवती, तदा ते जल-स्थानम् इतस्ततः अन्विष्यन्तः दूरात् एकत्र कूपम् अपश्यन्। कूपे एका युवतिः जलं भरन्ती आसीत्।

तेषु एकः युवतिम् उपेत्य जलं पाययितुं निवेदितवान्। सा तं पृष्टवती- 'त्वं कः असि?' सः अब्रवीत्- 'अहं दीनः अस्मि।' युवतिः कथितवती- 'दीनौ तु द्वौ एव स्तः। त्वं तृतीयः कुतः आयातः? सत्यं सत्यं वदिष्यसि, तर्हि जलं पाययिष्यामि, अन्यथा नहि।' तस्याः वार्त्तां निशम्य सः पिपासुः एव प्रत्यावृत्तः।

पुनः द्वितीयः पिपासुः तत्र गत्वा तां जलं पाययितुं यदा प्रार्थितवान्, तदा तम् अपि सा युवतिः अपृच्छत्- 'त्वं कः असि?' सः उदतरत्- 'अहं यात्री अस्मि।' युवतिः अकथयत्- 'यात्रिणौ तु द्वौ एव विद्येते। त्वं तृतीयः कुतः आगतः? अहं त्वां जलं नैव पाययिष्यामि।'

एवं तदा तृतीयः आत्मानं बलिनं परिचायितवान्, तदा तम् अपि युवतिः 'कथितवती' 'बलिनौ तु द्वौ एव वर्तेते। त्वं तृतीयः कथं बली असि? अहं त्वां जलं नैव पाययिष्यामि।'

अन्ते चतुर्थः उपस्थाय यदा तां जलम् अयाचत, तदा तम् अपि सा युवतिः तदीयं परिचयं पृष्टवती- 'त्वं कः असि?' सः अवादीत्- 'अहं मूर्खः अस्मि।' युवतिः अकथयत्- 'मूर्खौ तु द्वौ एव स्तः। त्वं तृतीयः कुतः आयातः? अहं त्वां जलं न पाययिष्यामि' इति उक्त्वा तान् सर्वान् तत्र कूपे एव उपावेश्य गृहं गतवती, ततः च तान् भोजयितुं मिष्टान्न-स्थालम् आदाय कूपे आगतवती।

इयति एव केचन जनाः युवत्याः पतिं कथितवन्तः यत्- 'तव पत्नीं तु चत्वारः जनाः अपहृत्य नयन्ति। ते इदानीं कूपे विद्यन्ते।' पतिः तदिदं श्रुत्वा तत्कालं राजानम् उपेत्य स्व-वेदनां निवेदितवान्। राजा अपि तत्कालं स्वव्यक्तिभिः निग्राह्य युवति-सहितान् तान् आहूतवान्। पुनः राजा युवतिं स्व-वार्त्तां स्पष्टां कर्तुं कथितवान्।

युवतिः अवादीत्- 'महाराज! दीने द्वे एव व्यक्ती भवतः एका पुत्री द्वितीयः च बलीवर्दः। यात्रिणौ अपि द्वौ एव भवतः: एकः सूर्यः द्वितीयः चन्द्रमाः च। बलिनौ अपि द्वौ एव विद्येते अन्नं जलं च। एवं मूर्खौ अपि द्वौ एव स्तः एकः राजा द्वितीयः मम पतिः च, यौ विना विचार-करणम् एव मां कुलाङ्गनाम् इह सर्व-जन-समक्षं विना किम् अपि अपराध करणम् आहूतवन्तौ।'

राजा लज्जितः जातः सर्वान् च अमुञ्चत् इति।

# करग्रहलीला

डॉ. अञ्जना शर्मा

पात्राणि -

- एका सखी - अन्या सखी
- अपरा सखी - श्रीकृष्णः
- सुबलः - मधुमंगलः
- राधा

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**ललिता शुभदा लीला गोविन्दस्य श्रियेऽस्तु वः।**
**श्रुता स्मृता स्तुता ध्याता कीर्तिता सेविता मुदा।।**

**सूत्रधारः** - यमुनादेव्यै नमो नमः। अहो यमुनायाः का शोभा? इन्द्रनीलमणिहारयष्टिरिव, इन्दीवर-मालेव, असितशाटीव वृन्दाटवीदेव्याः।

**नटी** (प्रविश्य) - आर्य! साधु। एवमेतत्। अपूर्वा शोभा यमुनायाः।

**सूत्रधारः** - महिमा अपि।

**नटी** - कथं नु।

**सूत्रधारः** - तरणितनूजापि सा शीतलजलौघपूर्णा तापमपहरति, यमस्य भगिनी अपि जीवनं ददाति, कृष्णजलापि सा पापकार्ष्ण्यमपाकरोति। अथ च

**नटी** - अथ किम्?

**सूत्रधारः** - गोविन्दसुखविवर्धिनी।

**नटी** - सत्यम्।

**सूत्रधारः** - यमुनापुलिनेषु गोविन्दः लीलां करोति।

**नटी** - आज्ञापयत्वार्यः, अद्य का लीला अनुष्ठेया?

**सूत्रधारः** -अद्य वनस्थलीविद्यापीठस्य संस्कृत-विभागेऽधिष्ठितया शर्मोपाह्वया **अञ्जनया** विरचितं 'करग्रहलीला' नामकं नवीनं नाट्यं नाटयितव्यम्। सम्प्रति अलमतिविलम्बेन, पश्य, सख्यो जलं ग्रहीतुं यमुनातटं गच्छन्ति। आवामप्यनुपदं गच्छावः।

**नटी** - आयातु चलावः।

(इति निष्क्रान्तौ)

(प्रस्तावना)

## प्रथमं दृश्यम्

(हस्ते घटमादाय सख्यः प्रविशन्ति।)

**एका सखी** - (ससम्भ्रमं) - अयि, सूर्यपूजायां विलम्बो जातः, त्वरितं चलन्तु।

**अपरा सखी** - आम्, आम्।

**अन्या सखी** - अद्य यमुनायाः कः घट्टः चलनीयः?

**एका सखी** - सूर्यघाटं चलामः, समीपमेव।

**अन्या सखी** - ओम् ओम्, अवश्यमेव।

(सर्वाः मिलित्वा गायन्ति)

**हर हर यमुने!**
**जय जय यमुने!**
**जय यमुने! जय जय यमुने!**
**कल्मषहारिणि जगदघमोचिनि**
**भानुपुत्रि! नमो नमो।**
**हर हर यमुने .......।।**
**मानसदायिनि केलिविनोदिनि**
**कलकलनिनादिनि नमो नमः।**
**हर हर यमुने .......।।**
**रसविस्तारिणि मोदविलासिनि**
**प्रेमप्रदायिनि! नमो नमः।**
**हर हर यमुने .......।।**

(गीतावसाने घाटसमीपमुपगम्य)

**एका सखी** - (सहर्षम्) अयि सखि! पश्य यमुनायाः शोभां, कथं कृष्णमयी सा?

**अपरा सखी** - अयि! श्रीकृष्णस्य दर्शनात् स्पर्शात् चैव सा कृष्णा।

**अन्या सखी** – अथ च सा सदैव श्रीकृष्णभावभाविता, अतएव कृष्णा।

**एका सखी** – सा भावनामेव न करोति, आराधनमपि।

**अपरा सखी** – (सोत्कण्ठम्) अहो नु खलु।

**एका सखी** – तरलतरंगहस्तेन जलजकुसुमैरेव।

**अन्या सखी** – अहो सखि! श्रीकृष्णप्रेमरसपूर्णा सा धन्या।

**अपरा सखी** – सत्यम्।

**अन्या सखी** – श्रीकृष्णं दृष्ट्वा स्पृष्ट्वा च, तस्य वंशीनादमपि श्रुत्वा कथं तस्याः जलं स्थिरतामायाति। इदानीं श्रीकृष्णश्चेत् स्यात् तर्हि वयं कथं जलं भरिष्यामः?

(तदैव श्रीकृष्णः प्रविशति।)

**एका सखी** – (दृष्ट्वा) अयि! पश्य, स तु अत्रैव।

**अन्या सखी** – (निर्निमेषं पश्यन्ती) कीदृशं नवघननीलशरीरम्।

**अपरा सखी** – पश्य, दीर्घघनकुञ्चितकेशपाशम्।

**एका सखी** – अहो, कुण्डलमण्डितगण्डविभागम्।

**अपरा सखी** – मृदुमधुरहासविलासम्

**अन्या सखी** – किं किं पश्यानि, सुन्दरं किं न सुन्दरम्?

**श्रीकृष्णः** – (समीपमुपगम्य) अयि महाभागाः, अत्र एकत्रीभूय किं कुर्वन्ति?

**एका सखी** – (सानन्दम्) ग्रहणम्।

**श्रीकृष्णः** – (सस्मितम्) कस्य?

**अपरा सखी** – (सहर्षम्) तव।

**श्रीकृष्णः** – (साश्चर्यम्) मम।

**अन्या सखी** – अहो रसस्य।

**श्रीकृष्णः** – घटैः

**एका सखी** (नाट्यम्) – अस्तु, यमुनाजलं ग्रहीतुं आगतवत्यः।

**श्रीकृष्णः** – यमुनाजलं? किन्तु प्रथमं **करं** तु ददातु।

**अपरा सखी** – (सकुतूहलम्) कस्य।

**श्रीकृष्णः** – यमुनाजलस्य।

**अन्या सखी** – कथं नु।

**श्रीकृष्णः** – यमुना अस्मदीया।

**अपरा सखी** – आस्माकीना अपि।

**श्रीकृष्णः** – अस्मदीया एव।

**एका सखी** – (सविस्मयम्) त्वदीया एव!

**अन्या सखी** – न अवगतम्।

**अपरा सखी** – वयं राधां वक्ष्यामः।

**श्रीकृष्णः** – (स्मरन्निव) बहु शोभनम्। एका क्रिया द्व्यर्थकरी।

(सख्यः गच्छन्ति)

(यवनिकापातः।)

## द्वितीयं दृश्यम्

(वयस्यैस्सह श्रीकृष्णः सूर्यघाटे वार्ता करोति।)

**श्रीदामा** – अये वयस्य! अद्य वयम् अत्र तिष्ठामः।

**मधुमंगलः** – (सोत्कण्ठम्) कथं भोः।

**श्रीकृष्णः** – प्रयोजनं विना कस्य प्रवृत्तिः?

**सुबलः** – कीदृशं प्रयोजनम्?

**श्रीकृष्णः** –करग्रहणम्।

**मधुमंगलः** – कस्य?

**श्रीकृष्णः** – यमुनाजलस्य।

**मधुमंगलः** – किमर्थम्?

**श्रीकृष्णः** – सम्बन्धात्

**मधुमंगलः** – (साश्चर्यम्) अहो, कथं नु।

**श्रीकृष्णः** – शृणु, ब्रह्मणः पुत्रोऽत्रिः, अत्रेः

**मधुमंगलः** – सम्यक्।

**श्रीकृष्णः** – ब्रह्मणः अपरः पुत्रः मरीचिः, मरीचेः

कश्यपः, कश्यपात् सूर्यः। सूर्यस्य पुत्री यमुना। पुराकाले मम जन्म चन्द्रवंशेऽपि अभवत्, चन्द्रः सूर्यस्य पितृव्यः। सम्बन्धेनानेन।

**मधुमंगलः** – (सापेक्षम्) अहो व्रजराज नन्दकुमार, जनास्तु दानं कुर्वन्ति। केचन धनं ददति, केचिद् वस्त्रं ददति।

**श्रीदामा** – कश्चिद् अन्नं ददाति, कश्चिद् जलं पाययति च। त्वं जलस्य करं ग्रहीष्यसि। इदन्त्वनुचितम्।

**श्रीकृष्णः** – अये, करस्वरूपे धनधान्यं न ग्रहीष्यामि।

**मधुमंगलः** – (सकुतूहलम्) तर्हि किं ग्रहीष्यसि?

**श्रीकृष्णः** – नवनीतम्।

**मधुमंगलः** – (सविस्मयम्) नवनीतम्।

**श्रीकृष्णः** – अस्तु, वद तुभ्यं नवनीतं रोचते न वा।

**मधुमंगलः** –(सानन्दम्) अहा, का कथा?

**श्रीकृष्णः** – वद, गावः केषाम्?

**मधुमंगलः** – अस्मदीयाः।

**श्रीकृष्णः** – यमुना केषाम्?

**मधुमंगलः** – अस्मदीया।

**श्रीकृष्णः** – गावः यमुनाजलं पिबन्ति, यमुनाजलादुत्पन्नानि तृणानि खादन्ति। तासाम् गोरसं सख्यः मथुरां नयन्ति। किं न्याय्यम्?

**मधुमंगलः** – (सानन्दम्) अहो ज्ञातम्। शोभनं, शोभनं कार्येऽस्मिन् तु वयं तव सहायकाः स्मः। संघे शक्तिः।

**श्रीदामा** – वद, किं करणीयमस्माभिः।

**श्रीकृष्णः** – एतावदेव, करदानेन विना जलग्रहणं अवरुणद्धु सखीः।

**मधुमंगलः** – (साभिमानम्) अवश्यमेव।

(यवनिकापातः।)

## तृतीयं दृश्यम्

(राधिकाभवने सख्यो राधिकया सह वार्तां कुर्वन्ति।)

**एका सखी** – अयि राधे! अद्य तु श्यामसुन्दरः यमुनाघाटे विराजते।

**अपरा सखी** – स करं याचते, विना करमस्मान् यमुनाजलं पूरयितुं न अनुमन्यते।

**राधा** – (सौत्सुक्यम्) करं, कथं नु।

**अन्या सखी** – यमुनायाः।

**एका सखी** – स वदति यद् यमुना अस्मदीया अतः करं दत्त्वा जलं गृह्णन्तु।

**अपरा सखी** – तव नामग्रहणे तु बहुशोभनमिति वदति।

**राधा** – (सस्मितम्) कीदृशं करं वाञ्छति?

**एका सखी** (सनाट्यम्) – न जाने।

**राधा** – गूढपदानि दुर्विज्ञेयानि।

**अन्या सखी** – त्वमेव चलित्वा समाधेहि।

**राधा** – अस्तु, चलामः।

(यवनिकापातः)

## चतुर्थं दृश्यम्

(सूर्यघाटे वयस्यैस्सह श्रीकृष्णः। सखीभिस्सह राधा आयाति।)

**मधुमंगलः** – (दृष्ट्वा) अये वयस्य! स्वयं वृषभानुनन्दिनी आगच्छति।

**श्रीकृष्णः** – (सहर्षम्) सौभाग्यकरं, करग्रहणं भविष्यति।

**मधुमंगलः** – (सहर्षम्, पुरतः गत्वा) जयतु जयतु वृषभानुनन्दिनी।

**एका सखी** – अये, त्वमपि अत्र।

**मधुमंगलः** – (सगर्वम्) अहो, आत्मानं विना शरीरं क्व? किन्तु त्वमत्र।

**अपरा सखी** – जलग्रहणाय।

**श्रीदामा** – प्रथमं करं ददातु।

**अन्या सखी** – (सविस्मयम्) करं, कथं भोः।

**मधुमंगलः** – यमुनायाः।

**अपरा सखी** – अहो नु खलु।

**मधुमंगलः** – यमुना अस्मदीया।

**अन्या सखी** – सत्यम्, अस्मदीया।

**मधुमंगलः** – (साभिमानम्) युष्मदीया न।

**एका सखी** – (साश्चर्यम्) कथं नु।

**सुबलः** – सम्बन्धेन।

**अपरा सखी** – (सोत्कण्ठम्) कः सम्बन्धः?

**मधुमंगलः** – (सगर्वम्) पारिवारिकः सम्बन्धः।

**अपरा सखी** – (साश्चर्यम्) कथं नु भोः।

**मधुमंगलः** – कदाचन चन्द्रवंशे मम मित्रस्य जन्म अजायत, चन्द्रस्सूर्यस्य पितृव्यः, अथ च सूर्यस्य तनया यमुना। सम्बन्धेनानेन चन्द्रवंशीयानामधिकारः यमुनाजले।

**एका सखी** – (सहासम्) अपूर्वः सम्बन्धः, अरे ब्रह्मा सृष्टिकर्ता, ब्रह्मण एव प्रजाः सर्वाः, अनेन तु परस्परं सम्बन्धः एव, तदैव तु वसुधैव कुटुम्बकमिति न जानाति।

**मधुमंगलः** – अस्माकं निकटसम्बन्धः।

(सखी राधां प्रति पश्यति। राधा संकेतं ददाति।)

**एका सखी** – अस्माकं साक्षात्सम्बन्धः।

**श्रीदामा** – कथं नु।

**एका सखी** – (सोत्साहम्) भक्त्याः।

**मधुमंगलः** – (सोत्कण्ठम्) किम्?

**एका सखी** – यमुना सूर्यतनया, सूर्यस्य वयमुपासिकाश्च।

**अन्या सखी** – अधुना वद, कस्य सम्बन्धः श्रेष्ठः?

**मधुमंगलः** – (सशंकम्) अत्र तु द्विविधा जाता। वयस्य! द्विविधायाः किं फलम्।

**श्रीकृष्णः** – (सकुतूहलम्) द्विविधा का।

**मधुमंगलः** – (सनाट्यम्) त्वया कः सम्बन्धः श्रेष्ठः मन्यते?

**श्रीकृष्णः** – (स्मरन्निव) भक्तिसम्बन्धः।

**मधुमंगलः** – (सनैराश्यम्) एतेन तु पक्षाघातः जातः, अधुना करः कथं संगृहीतः भविष्यति।

**श्रीकृष्णः** – (सस्मितम्, राधामवलोक्य) देवी एव वक्ष्यति। करः स्वीक्रियते न वा।

**मधुमंगलः** – (सहासम्) भवतु विज्ञातम्।

**एका सखी** – अहो अवगतम्, अत्र तु करग्रहणं किम्।

**अन्या सखी** – (सहर्षम्) अवगतम्, अवगतम्।

एका सखी – (सादरम्) द्वयोः एकस्वरूपम्, को ग्राही कस्य ग्रहणम्?

**मधुमंगलः** – (सत्यम्) तर्हि वयस्य! नवनीतं न प्राप्स्यामि।

**राधा** – (सप्रणयम्) अवश्यमेव प्राप्नोतु।

**मधुमंगलः** – (सोत्कण्ठम्) कुत्र?

**अपरा सखी** – गृहमागत्य, नवनीतं दक्षिणाञ्च।

**मधुमंगलः** – (सानन्दम्) जयतु जयतु वृषभानुनन्दिनी।

**एका सखी** – (साह्लादम्) जयतु जयतु नन्दकुमारः।

(सर्वे हसन्ति जयघोषं कुर्वन्ति च।)

(भरतवाक्यम्।)

**करग्रहणलीला तु गोविन्दस्य श्रियेऽस्तु वः।**
**मनो निगृह्य धृत्वा तं शिरसि कामदं करम्॥**

॥ यवनिका पतति॥

इति वनस्थलीविद्यापीठस्य संस्कृतविभागेऽधिष्ठितया शर्मोपाह्वया **अञ्जनया** विरचितं **करग्रहलीलाख्यं** लघुनाट्यमवसितम्।

# दर्शनानां लोकन्यायानाञ्च मूलभूता वेदभागाः

❑ डॉ. के.मल्लिका

**स्थाणुरयं भारहारः किलाभूत्**
**अधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत् सकलं भद्रमश्नुते**
**नाकमेति ज्ञानविधूतपाप्मा।।** (नि. 1-6)

इत्यादिप्रमाणपर्यालोचनया वेदार्थज्ञानाभावेऽनिष्टस्य, तत्सद्भावे इष्टस्य चावगतेरीदृशानां वेदानामर्थज्ञानमावश्यकमिति सिद्ध्यति।

**कपिलस्य कणादस्य गौतमस्य पतञ्जलेः।**
**व्यासस्य जैमिनेश्चापि शास्त्राण्याहुर्मनीषिणः।।**

इति षड्दर्शनवादिनां मतम्।

**द्वितीयम्** - सांख्यम्, वैशेषिकम्, न्यायः, योगः, पूर्वमीमांसा, उत्तरमीमांसा, सौत्रान्तिकम्, वैभाषिकम्, योगाचारम्, माध्यमिकम्, जैनम्, चार्वाकमिति द्वादश दर्शनानि-इति।

**तृतीयं** मतम् - सर्वदर्शनसंगृहीतानि षोडशदर्शनानीति। तानि च - चार्वाकबौद्धार्हतरामानुजपूर्णप्रज्ञनकुलीशपाशुपतशैवप्रत्यभिज्ञारसेश्वरौलूक्याक्षपादजैमिनिसांख्यपातञ्जलशाङ्कराणीति विज्ञेयानि।

**चार्वाकदर्शनम्** -

**यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।**

इति लोकगाथामनुरुन्धानं दर्शनमिदम् आत्मैव नास्ति यद्वा पृथिव्यादिभिश्चतुर्भिर्भूतैरारब्धं शरीरमेव आत्मा अस्तु, देहनाशे स नश्यति, इह लोके अनुभूयमानं सुखमेव पुरुषार्थः, पारलौकिकं सुखमेव नास्ति, किं पुनस्तस्य पुरुषार्थत्वमित्यादि सूचयति। अत्र मूलं वेदभागो अयं यथायथमनुसंधेयः 'वायुरनिलममृतमथेदं भस्मान्तं शरीरम्' (ईश. 17)।

**नखश्च पृष्ठश्च करौ च बाहू जङ्घे चोरू उदरं शिरश्च रोमाणि मांसं रुधिरास्थिमज्जामेतच्छरीरं जलबुद्बुदोपमम् ( ऋ.खि )।**

'विज्ञानघन एवैतेभ्यो भूतेभ्यः। समुत्थाय तान्येवानु विनश्यति' (बृह,उप. 2.4.12)।

'को बहि तद्वेद यद्यमुष्मुन् लोकोऽस्मि वा नवेति' (तै.सं. 6.1.1) इति।

**बौद्धदर्शनम्** -

माध्यमिको नाम बौद्धः शून्यमेव परमार्थसत् जगत्तु सांवृतसत्यं शून्ये कम्पितमिति मन्यते। तत्र मूलं वेदभागः तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतस्सज्जायत। (छा.उप.6.2.1)। तथा -

**देवानां युगे प्रथमेऽ सतस्सदजायत।**
**तदाशा अन्वजायन्त तदुत्तानपदस्परि।।**
(ऋ. 10.72.3)

क्षणिकं ज्ञानमेव तत्त्वं, ज्ञानातिरिक्तोऽर्थो नास्तीति योगासारमतम्। अत्र मूलं -

'विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति प्रेत्य संज्ञास्तीति' (बृह.उप.2.4.12) इति।

सर्वं क्षणिकमिति वादस्य -

'श्वोभावा मर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव
तवैव वाहास्तव नृत्यगीते।।'
(कठ.उप.1.26) इति।

सर्वं दुःखमिति समयस्य मूलम् -

'एष त आत्मा अन्तर्याम्यमृतोऽतोऽन्यदार्तम्'
(बृह.उप.3.7.22)

**अर्हन्दर्शनम्** -

अर्हन् जिन तदुपदेश्याः आर्हतास्तेषां दर्शनम्। अर्हतो लक्षणमित्थं वर्ण्यते।

**सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः।**
**यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः।।**
(आप्तनिश्चयालङ्कारः) इति।

अत्र मूलं - **'यस्सर्वज्ञस्सर्वविद् यस्य ज्ञानमयं तपः'** (मु.उप. 1-1-9)।

तथा- **'हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्'** (मु.उप. 2-2-9) इति च।

केषांचनार्हतानां मते जीवनास्रवादयः सप्त तत्त्वानि। आस्रवो योग पर्यायौ। स च द्विविधिः शुभाशुभभेदात्।शुभस्तु अहिंसादिः।

अत्र मूलं -

न हिंस्यात्सर्वा भूतानीति। अशुभस्योदाहरणं सत्यहितमितभाषादि।

अत्र मूलं -

**सत्यं वद, धर्मं चर** (तै.उप.2-13) इति।

**रामानुजदर्शनम् - विशिष्टाद्वैतम्।**

विशिष्टाद्वैतमिति पदं विशिष्टयोरद्वैतमिति व्युत्पत्त्या लब्धम्। स्थूलचिदचिद्विशिष्टस्य ब्रह्मणः सूक्ष्मचिदचिद्विशिष्टब्रह्मणश्च मिथ ऐक्यम्। तत्र चिच्छब्दवाच्या जीवाः परस्परं ब्रह्मणो भिन्ना नित्याश्च।

अत्र मूलं -

**'द्वा सुपर्णा सयुजा सखाया'** (मु.उप.3-1-1)

**'नित्योऽनित्यानां चेतनश्चेतनानाम्'** (कठ.उप.5-13) इति।

अचिच्छक्त्या दृश्यम् जडं जगत्। तस्य जगतः कर्ता उपादानं च परमात्मा।

अत्र मूलं -

**आत्मन आकाशः सम्भूत सोऽकामयत** (तै.उप.2.1)

विशिष्टाद्वैतनिर्वहणं तु इत्थं - **'द्वा सुपर्णे'** त्यादिना जीवब्रह्मणोर्भेदोऽवगम्यते। स 'आत्मा तत्त्वमसी' त्यादिना तयोरभेदोऽवगम्यते। अनयोर्विरुद्धयोर्घटनाय प्रवृत्तेः **'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरं यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृतः'** (बृह.उप. 3.7.3) इत्यादिवाक्यैः जीवजडयोर्भगवच्छरीरत्वावगमेन शरीरवाचकानां शब्दानां शरीरिणि पर्यवसानस्य लोकदृष्टत्वेन च निरुक्तविशिष्टाद्वैतेति युक्तः। किञ्चैतदर्शने नित्यसूरयो गरुडानन्तविष्वक्सेनादयो नित्यमुक्ताः स्वीचि-कीर्षिताः।

तत्र मूलं - **'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्'**। (तै.सं. 1.3.6) इति।

**पूर्णप्रज्ञदर्शनम्-**

स्वतन्त्रं परतन्त्रञ्चेति द्विविधं तत्त्वम्। स्वतन्त्रो भगवान्विष्णुः अन्यदस्वतन्त्रमिति। अत्र मूलं-

**न ते विष्णो जायमानो न जातो**
**देव महिम्नः परमन्तमाप**
(ऋ. 7-99-2)।

**'नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्। न तस्येशे कञ्चन तस्य नाम महद्यशः'**।। (तै.आ. 6.1) इत्यादि। किञ्च दर्शने अस्मिन् जीववैविध्यमसाधारणं तत्त्वम्। मुक्तियोग्या नित्यसंसारिणस्तमोयोग्याश्चेति।

अत्र मूलं-

**शृण्वे वीर उग्रमुग्रं दमायन्नन्य-**
**मन्यमति नेनीयमानः।**
**एधमानद्विलुभयस्य राजा**
**चोष्कूयते विश इन्द्रो मनुष्यान्।।**
(ऋ. 6.47.16) इति।

**नकुलीपाशुपतदर्शनम्-**

पशुपतिर्महादेव आराध्यः। स तु कर्मनिरपेक्षस्सन् जगत्कारणम्। पशुर्द्विविधः साञ्जनः (शरीरेन्द्रियसम्बन्धी) निरञ्जनः (तद्रहितः) चेति। तादृशस्य पशोः पतिः। निरतिशयदृक्क्रियाशक्तिमानिति मुख्यं प्रमेयम्।

अत्र मूलं-

**'भूः सृष्ट्वा पतयस्यथेशः सर्वाधिपत्यं कुरुते महात्मा'** (श्वेत.उप.5-3)।

तथा-

'स कारणं कारणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः।
छन्दांसि यज्ञाः क्रतवो व्रतानि
भूतं भव्यं यच्च वेदा वदन्ति।
अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया सन्निरुद्धः।।'
(श्वेत.उप. 4-9) इति।

एवं-

'न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च'
(श्वेत.उप. 6-7) इति।

अत्र स्वभाविकत्वं नाम
कर्मनिरपेक्षत्वं विवक्षितम्।।

**शैवदर्शनम्-**

पतिः पशुः पाश इति त्रीणि तत्त्वानि। तत्र पतिः शिवः पशुर्जीवः पाश अचेतनमिति विवेकः। स न शिवः कर्मादिसापेक्षो जगत्कारणम्। अन्यथा वैषम्यनैर्घृण्याद्यापद्यते।

**अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।**
**ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा।।**

इति न्यायेन कर्मसापेक्षत्वेन परमेश्वरस्य कर्तृत्वोपपत्तेः।

अथ- 'अथैकयोर्ध्वमुदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्' (प्रश्न.उप. 3.7) इति। किञ्च स च शिवः अशरीर एव जगत्कर्ता सशरीरत्वे क्लेशादिप्रसङ्गादशरीरस्याप्यस्य शरीरादाविव घटादौ कर्तृत्वमुचितम्।

अत्र मूलम्- **'अपाणिपादो जवनो गृहीता**

**पश्यत्यचक्षुः स शृणोत्यकर्णः**' (श्वेत.उप. 6-7) इति।

अथवा स शरीर एवायं शिवः न चैवं क्लेशादिप्रसङ्गोऽस्य शरीरस्यास्य शक्तत्वाभ्युपगमात्। श्राव्यते चायमीशानादिभिः पञ्चभिर्मन्त्रैः मस्तकादिकल्पनया ईशानमस्तकः तत्पुरुषवक्त्रः अघोरहृदयः वामदेवगुह्यः, सद्योजातपाद इति। ते च मन्त्राः- ईशानः सर्वविद्यानामित्यादयः तैत्तिरीयारण्यके षष्ठप्रश्ने समाम्नाता वेदितव्या इति।

**प्रत्यभिज्ञादर्शनम्** -

प्रत्यभिज्ञानं प्रत्यगात्मनः अहं परमेश्वर एवेति ज्ञानम्। तन्मात्रं मोक्षाभ्युपायः। मोक्षश्च परिपूर्णात्मलाभः। प्रत्यगात्मनां परमेश्वरभावः स्वतस्सिद्धोऽपि मायावशात् न प्रतिभासते। गुरूपदेशेन मायायां निवृत्तायां स परिपूर्णतयानुभूयते। स परमेश्वरः केवलं स्वेच्छया जगन्निर्माति। स्वकीयेन प्रकाशचिद्रूपमहिम्ना जगद्भासयति इति परमं प्रमेयम्।

अत्र मूलम् -

'**अहं ब्रह्मास्मि** (बृह.उप 2-4-10)।
**यो वेदास्य स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।**
**तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥**'
(महाना.उप. 10. अ)
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
(मु.उप. 1-2-12)।
**तस्याभिध्यानात् योजनात्तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः** (श्वेत.उप. 1-10)
**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति** (कठ.उप. 5-15)
**इच्छामात्रं प्रभोः सृष्टिः** (माण्डू.उप. 1.8)
इति च।

**रसेश्वरदर्शनम्** -

रसः पारदादिरसः। स एव सेवितस्सन् ईश्वर-तादात्म्यापत्तिरूपाया जीवन्मुक्तेः पिण्डस्थैर्यसम्पादनद्वारा आत्मतत्त्वाभ्यासमुखेन ज्ञानं प्रापय्य हेतुर्भवतीति परमं रहस्यम्।

अत्र च मूलम् '**रसो वै सः**' 'रसं ह्येवायं लब्ध्वा आनन्दी भवति। (तै.उप.2-7) तथा -

**अत्र ब्रह्मसमश्नुते**' (कठ.उप.6-14) इति च वेदभागौ मूलम्।

अत्र आयुर्घृतमितिवत् परमेश्वरतादात्म्यापत्ति-साधने रसे तद्वाचकसर्वनामप्रयोगः रसो वै स इति 'अत्र ब्रह्म समश्नुत' इत्यत्र अत्रेत्यनेन विद्यमानशरीर एवेत्यर्थस्य विवक्षणम्। ततश्च उक्तार्थलाभः॥

**औलूक्यदर्शनम्** -

दर्शनस्यास्य वैशेषिकदर्शनं कणाददर्शनमिति च नामान्तरम्। अत्र दर्शने सप्त पदार्थाः। द्रव्यं गुणः कर्म सामान्यं समवायो विशेषश्चेति षट् भावपदार्थाः। अभावश्च सप्तम इति। एतेषां तत्त्वज्ञानात् व्याप्तिज्ञानं ततोऽनुमानद्वारा मननरूपं ज्ञानं जायते। तेन च ईश्वरसाक्षात्कारः तत आत्यन्तिकदुःखनिवृत्तिरूपो मोक्षो जायते इति सारांशः।

अत्र च मूलम्- '**तरति शोकमात्मवित्**' (छा.उप. 7-1-3) '**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्**' (बृह.उप. 2-4-5) इति। अत्रात्मपदेन ईश्वरः इदं सर्वमित्यनेन सप्तपदार्थाः च गृह्यन्ते। ततश्च

सप्तपदार्थों ज्ञानमात्मज्ञानद्वारा सफलं भवतीति तात्पर्यार्थलाभः।।

**अक्षपाददर्शनम् -**

न्यायदर्शनमिति पर्यायः। अत्र प्रमाणप्रमेय-संशयादयः षोडशपदार्थाः। तेषां तत्त्वज्ञानात् निश्श्रेयसाधिगमः। आत्यन्तिकैकविंशतिदुःखध्वंसो मोक्ष इत्युच्यते। एकविंशतिदुःखेषु शरीरमप्यन्तर्गच्छति। ततश्च शरीरसाध्यं ज्ञानं सुखदुःखाद्यपि नास्ति मोक्षे इति सारसंग्रहः।

अत्र च मूलं- **'तरति शोकमात्मवित्'** (छ.उप.7-7-3) **'आत्मा वारे'** इत्यादि। (बृ.ह. 2-4-5) **'न प्रेत्य संज्ञास्तीति'** (बृह. 2-4-12), अथवा 'अशरीरं वावसन्तं न प्रियाप्रिये स्पृशतः' (छा.उप. 7-12-1) इति स्पष्टं वाक्यान्तरमुक्तार्थे सर्वस्मिन् मूलतयाङ्गीकारमर्हति। दर्शनेऽत्र ईश्वरस्य प्रामाण्यस्थापनं मुख्यविषयतां प्रतिपद्यते। यथा **चाहोदयानाचार्यः -**

'साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः।
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः॥'
(न्या.कु. 4-6) इति।

अत्र च मूलं- **'यदेव साक्षादपरोक्षाद् ब्रह्म'** (बृह.उप. 5-5) इति। किं चेश्वरः परमाणूनुपादानीकृत्य स्वयं निमित्तकारणं सन् जगत् सृजति इत्यपि परमं प्रमेयम्।

अत्र मूलं च -

**विश्वतश्चक्षुरुत विश्वतो मुखो**
**विश्वतो बाहुरुत विश्वतस्पात्।**
**सं बाहुभ्यां धमति संपतत्रैर्द्यावा**
**भूमी जनयन् देव एकः।।**
(ऋ. 10-81-3) इति।

अमुं मन्त्रं व्याख्याति उदयः - 'अत्र प्रथमेन सर्वज्ञत्वं चक्षुषा दृष्टेरुपलक्षणात्। षष्ठेन परमाणुरूपधानाधिष्ठेयत्वं ते हि गतिशीलत्वात् पतत्रव्यपदेशाः पतन्तीति। सन्धमति सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः। तेन संयोजयति समुत्पादयन्नित्यर्थः।' (न्या.कु.वि. 52-53) इति। कृत्स्नवेदप्रतिपाद्य ईश्वरः सार्वज्ञ्यादिमहिमा इत अप्यधिकतया कुसुमाञ्जलौ प्रतिपादितः।

**जैमिनिदर्शनम् -**

पूर्वमीमांसादर्शनमित्यपरं नामास्य दर्शनस्य। इदञ्च द्वादशाध्यायीरूपं दर्शनम्। अत्र क्रमेण प्रमाणं भेदः शेषत्वं, प्रयोज्यत्वं, क्रमः, अधिकारः, सामान्यातिदेशः, विशेषातिदेशः, ऊहो, बाधः, तन्त्रं, प्रसङ्गश्चेति प्रधानप्रतिपाद्यतया धर्मविषया अध्यायैर्विचार्यन्ते। ईदृशी मीमांसा वेदमूलिका वेदार्थनिर्णयोपायानां न्यायानां सङ्कलनरूपत्वात्।

अपि च वेदेऽपि ईदृशी मीमांसा तत्र तत्र दृश्यते। यथा- उपस्थेयोअग्नी 3 नोंपस्थेया 3 इत्याहुर्मनुष्या यन्वै यो अहरहराहृत्याथैनं याचति स इन्वै तमुपार्च्छत्यथ को देवानहरहर्याचिष्यतीति। तस्मान्नोपस्थेयो अथो खल्वाहुराशिषे वैकं यजमानो यजत इत्येषा खलु वा आहिताग्नेराशीर्यदग्निमुपतिष्ठते तस्मादुपस्थेयः इति। (तै.सं. 1-5-9)। अस्याशयस्तु- प्रतिदिनं सायं एताश्चाग्नेरुपस्थानं कर्तव्यं न वेति संशयः। न कर्तव्यमिति पूर्वपक्षः। कुतः उपस्थानेनाग्नेरुपद्रवप्रसङ्गात्। तथा हि- यजमानः स्वल्पं हविर्दत्वा आयुरादीनि बहूनि

फलानि याचमानः कथमग्निं न बाधते। यथा खलु दरिद्रः कश्चिन्मनुष्यः अल्पं जम्बीरफलादिकं दत्वा राजानं बहूनि धनानि याचमानो बाधते तथा।

तस्मादग्नेरुपस्थानं न कर्तव्यमिति पूर्वपक्षः। सिद्धान्तस्तु- अग्नेरुपस्थानं कर्तव्यमिति। यजमानः स्वाभीष्टमखिलं याचितुमेव खल्वग्निं यजति यजेतेति विहितत्वात्। न च हाविषोऽल्पत्वं शङ्कनीयम्, एतस्य यजुषो वीर्येण यावदेका तावदाहुतिः देवता कामयते यावदेका प्रथमे (तै.ब्रा. 6-2-6) इति वाक्येन मन्त्रसामर्थ्ये न हविषो वर्धमानत्वावगमात्। अतो जम्बीरफलादिवैषम्यादग्निरुपस्थे इति ईदृशमीमांसानुसारित्वादपि वेदमूलकतयास्या मीमांसाया यज्यते। न माता वर्धते न पिता इत्यादि वाक्यान्यपि यथायथमूहादिमूलान्यनुसन्धेयानीति।।

**पाणिनिदर्शनम्** -

दर्शनमिदं व्याकरणशास्त्रमिति प्रसिद्धम्। अस्य शब्दानुशासनमिति नामधेयं पतञ्जलिना 'अथ शब्दानुशासनम्' इति महाभाष्यं प्रारभमाणेन कृतम्। अनेन '**शं नो देवीरभीष्टये**' (अथर्व सं 1-1) इत्यादयो वैदिकाश्शब्दाः गौरश्व इत्यादयो लौकिकाश्च शब्दाः प्रकृतिप्रत्ययविभागवत्तया बोध्यन्ते इति नामधेयमिदमन्वर्थकम्।

अत्र मूलम्- **वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्** इमां नो वाचं व्याकुर्विति। सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्यता इति। तस्माद्वै द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोअवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते (तै.सं.6-4-7) इति वेदभागाः।

सोऽयं वेदभाग इत्थं व्याख्यातः सायणीये भाष्ये- 'यथा वैदिकमन्त्ररूपा वाक् सा पूर्वं पराची समुद्रघोषवत् एक्यरूपेण दण्डायमाना तस्यां वाचि एतावदेकं वाक्यं तस्मिन्वाक्येप्येतावदेकं पदं तस्मिन् पदेऽपि इयं प्रकृतिः अयं प्रत्यय इत्येवं विभज्य सर्वतः करणं व्याकरणं तद्रहितत्वादव्याकृतैव। अवदतवृता। तामिन्द्रो मध्यतोऽवक्रम्य वाक्यपदादिरूपेण तत्र तत्र विच्छिद्य विभिन्नं कृतवान्।' इति।

किञ्च एकश्शब्दस्सम्यग्ज्ञातः सुष्ठु प्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति प्रमाणं दर्शनस्यास्य साधुशब्दप्रयोगद्वारा स्वर्गफलकत्वं श्रावयति।

ननु अचेतनस्य शब्दस्य कथमीदृशं सामर्थ्यम्? अत्र महाभाष्यकारः -

'चत्वारि शृङ्गा त्रयो अस्य पादा<br>
द्वे शीर्षे सप्त हस्तासो अस्य।<br>
त्रिधा बद्धो वृषभो रोरवीति<br>
महो देवो मर्त्यां आविवेश।।' (म.ना. 10-1)

इति मन्त्रः प्रमाणयन्नचेतनस्यापि शब्दस्य महता देवेन साम्यं संसूच्य निरुक्तसामर्थ्यं व्यञ्जयामास इति।

**सांख्यदर्शनम्** -

अत्र चत्वारि, तत्त्वानि प्रतिपादितानि। कश्चिदर्थः प्रकृतिरेव यथा मूलप्रकृतिः। कश्चिदर्थः प्रकृतिविकृत्युभयरूपः यथा महदादिः। कश्चिदर्थो विकृतिरेव यथा पञ्चभूतानि एकादशेन्द्रियाणि च। कश्चिदर्थः न प्रकृतिर्नापि विकृतिः यथा जीवाख्यः पुरुष इति। तत्र प्रकृतिपुरुषसम्बन्धः संसारस्तद्वियोगो मोक्ष इति पुरुषोऽप्यकर्तृत्वेन निर्लेप इति परमसिद्धान्तः। अत्र सर्वत्र मूलम्-

**'अजामेकां लोहितशुक्लकृष्णां**
**बह्वीः प्रजा सृजमानां सरूपाः।'**
**अजो ह्येकःजुषमाणोऽनुशेते**
**जहात्येनां भुक्तभोगामजोऽन्यः।** (श्वेत.उप.4-5)

इति वेदमन्त्रः। तथा 'असङ्गो ह्ययं पुरुषः' (बृह.उप. 4-3-15) इति च।

**पातञ्जलदर्शनम्** -

दर्शनस्यास्य संख्याप्रवचनं योगशास्त्रमिति च नामान्तरं। इदं च पादचतुष्टयात्मकम्। योगो नाम चित्तवृत्तिनिरोधः कृत्स्नशास्त्रप्रतिपाद्यः समाधियोगः तपः स्वाध्यायेश्वरप्रणिधानादिरूपः क्रियायोगः धारणाध्यानादिः जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः क्रमशः पादप्रतिपाद्या अर्थाः। अन्ततः स्वरूपप्रतिष्ठापरपर्यायः कैवल्यरूपो मोक्षश्च प्रतिपाद्यः। अत्र मूलम् -

**'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूया-श्चान्ते विश्वमायानिवृत्तिः'** (श्वे.उप. 1-10) 'आत्मा वारे द्रष्टव्यः श्रोतव्य मन्तव्यो निदिध्यासितव्यः' (बृह. उप. 2-4-5) 'स्वाध्यायप्रवचने एवेति नाको मौद्गल्यःस्वाध्यायोऽध्येतव्यः' (तै.आ. 2-15) 'यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते याँश्च कामान् तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः' (मुण्डक.उप. 3-1-10) 'स भगवः कस्मिन् प्रतिष्ठित इति स्व महिम्नि' (छा.7-2-4) इत्यादिविभागाः इति।

**शाङ्करदर्शनम्** -

अत्र प्रतिपाद्यविषयो वेदान्तशास्त्रं चतुर्लक्षणी-रूपम्। अस्य विषयः प्रत्यग्ब्रह्मैक्यम्।

यथा- 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू. 1-1-30) इत्यादौ। ब्रह्मसूत्रेषु चतुर्षु अध्यायेषु क्रमशः सर्वेषां वेदान्तानां ब्रह्मणि तात्पर्यं सांख्यादितर्कविरोधनिराकरणं ब्रह्मविद्यासाधनं ब्रह्मविद्याफलं चेति प्रमेयं प्रतिपाद्यम्। अत्र कृत्स्नस्य वेदान्तशास्त्रस्य वेदैकदेशरूपोपनिषदर्थतात्पर्य-निर्णायकन्यायव्युत्पादकत्वरूपं पारिभाषिकं वेदमू-लकत्वं विज्ञेयम्। अध्यायार्थेषु तु मूलानि वेदभागा इमे- 'सर्वे वेदा यत्पदमामनन्ति' (कठ.उप. 2-15) 'नैष तर्केण मतिरापनेया' (कठ.उप. 2-9) 'यदेव साक्षादपरोक्षाद्ब्रह्म' (ब्रह. 5-5) 'आत्मा वारे' (बृह. 2-4-5) 'तरति शोकमात्मवित्' (छा. 7-1-3) भूयश्चान्ते विश्वमायानिवृत्तिः

**'नासदासीन्नो सदासीत्' (ऋ. 10-129-9)**

अहं ब्रह्मास्मि (बृ. 2-5-10) 'मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन' (कठ.उप.) इति।

लोकन्याय (लोकानुभव) मूलभूता वेदभागा उदाह्रियन्ते। लोकानुभवः स्वकीयोपद्रवपरिहाराय मातापितरौ पुत्रान् पुष्णीत इति। अस्य मूलं- **'अस्मै वै पितरौ पुत्रान् बिभृतः'** (तै.सं. 6-1-6) इति। वाक्यमिदं कद्रुश्च वै सुपर्णी चात्मरूपयोरस्पर्धेतामि-त्यनुवाके घटकम्। अस्य भावमात्रमनूद्यते कद्रूः सौन्दर्येणाधिका उत सुपर्णी इति विवादे प्रसक्ते मध्यस्थाः कद्रूरेव सौन्दर्येणाधिका इति निरणयन्। तदात्वे दासीभूतां सुपर्णीं कद्रूः आज्ञापयामास इतो लोकात्तृतीये लोके स्वर्गे सोमो वर्तते तमाहर। अथ दासीभावात् त्वां मोचयेयमिति। अथ स्वपुत्रान् गायत्र्यादिछन्दोरूपान् सुपर्णी अब्रवीत् पुन्नामनरका-दिनानाविधदुःखेभ्यस्त्राणकर्तृत्वात् पुत्रशब्दवाच्या मां कद्रूदासीभावप्रयुक्तदुःखात् त्रातुं स्वर्गे स्थितां

सोमलतामाहरत, एवमादि दुःखपरिह
मातापितरौ पुत्रान् बिभृत इति। अथ मा
ऊह्य जगतीत्रिष्टुभ्गायत्रीछन्दांसि स्वर्ग
जगतीत्रिष्टुभो: पराजय: गायत्र्या जयश्चा

**लोकानुभव:** – प्रभूतघासभक्ष
गोषु। मूलं– **'ऊर्जस्वती: पयस्वती**
**पय: सम्भरति इति वाक्यम्'** (तै.
'अन्नेनास्थ्याद्युपचय: अन्यव्यतिरेक
मूलं– **'मनुना कृता स्वधया वितष्टेत्य**
**पशु: स्वधाकृता'** (तै.ब्रा. 3-
राजनियुक्तस्य भृत्यस्य मनुष्येभ्यो निर्भ
मूलं– 'अथो यथा वस्यसे प्रतिप्रोच्यादे
एवमेव तदध्वर्युर्गवेभ्य: प्रतिप्रोच
आत्मनोअहि सायम्।' (तै.ब्रा. 3-
तात्पर्यार्थ: – यथा लोके कश्चित् भृत्यो
ग्रामेषु गत्वा बलाद्गृह्यमाणं द


सारे भारत की
पाञ्चजन्य
साप्ताहिक



ई-पेपर की सुविधा

You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1450 (साधारण डाक द्वारा) | ORGANISER ₹1450 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा) |
|---|---|---|---|

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

भारत प्रकाशन (दिल्ली) लिमिटेड

द एड्रेस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई- मेल : advt@bpdl.in

# राष्ट्ररक्षणम्

❑ प्रो.ताराशंकर शर्मा पाण्डेयः

प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

मातृभूमिवन्दनं मदेकधर्मसंश्रुतम्
आत्मराष्ट्ररक्षणं त्वदेककर्मसङ्गतम्।
राष्ट्ररक्षणे क्षमा समस्तलोकबोधिका
धर्मकर्मपावना लसेन्मनःसु भावना।।१।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

स्वर्गलोकदेववृन्द- नित्यकांक्षितं पुरा
रामकृष्णबुद्धजन्मशुद्धभूमिशोभितम्।
सोमनाथ-विश्वनाथ-सारनाथ-राजितं
राष्ट्रभक्त! देवभूमिभारतं सुरक्ष रे!।।२।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

यत् सुभाषचन्द्रबोस-बुद्धिकल्पितं सदा
यत् स्वतन्त्रहिन्दफौजरक्षितं सुभारतम्।
यत् पटेलवल्लभैक्य- योजनासुघट्टितं
देशभक्त! तत्सुरक्ष दिव्यभूमिभारतम्।।३।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

आंग्ललोकपीडिता जनास्त्वयैव रक्षिताः
नीचशत्रुसैनिकाः पुरा त्वयैव मर्दिताः।
सीम्नि शत्रुचारिणः शृणु प्रगुप्तमर्म रे!
देशभूमिरक्षितः! स्मर त्वदीयकर्म रे!।।४।।

प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

श्रीशिवादिनैकवीर- शौर्यरंगरंजितं
श्रीमहात्मगान्धिशान्तिशुभ्रवर्णशोभितम्।
श्यामसस्यपूर्णमंगलं त्रिरागभारतं
रे! त्रिरंगभावभूषितं सुरक्ष भारतम्।।५।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

रामराज्यकल्पना कृता महात्मगान्धिना
दुष्टशत्रुलोकिताऽद्य सीमभूकुदृष्टिना।
पश्य पाकदुष्कृतं जगज्जनैर्विनिन्द्यते
अस्त्रशस्त्रसज्जितो भुवं त्वमेव रक्ष रे!।।६।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

चण्डरूपचण्डिका भवेत् त्वदीयवीरता
कालरूपकालिका भवेत् त्वदीयशूरता।
कालदण्डपातनं कुरु त्वमेव वीर रे!
शत्रुसैन्यनाशनं शुभं त्वदीयकर्म रे!।।७।।
प्रचण्डशूरवीर हे! विधेहि राष्ट्ररक्षणम्।
विधेहि धीरवीर हे! मदीयराष्ट्ररक्षणम्।।
विधेहि राष्ट्ररक्षणम्।।

- इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-
प्रतिनवबाणभट्ट-पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन
श्रीकल्लाजी-वैदिकविश्वविद्यालयकुलपतिना
प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं
'राष्ट्ररक्षणसप्तकम्' नामकाव्यं सम्पूर्णम्।

# चरित्रनिर्माणपूर्वकं व्यक्तित्वविकासः शिक्षोद्देश्यम्

❑ डॉ.रणजीतकुमारझाः

धर्मं विना समाजः स्थातुं शक्नोति परन्तु शिक्षां विना असम्भवैव समाजस्य स्थितिरिति। शिक्षां विना व्यक्तेः समाजस्य चाधारोद्देश्यस्य चरित्रस्य व्यक्तित्वस्य वा स्थापना नैव सम्भवति। शिक्षाप्रसारार्थं सामाजिकं प्राकृतिकं च वातावरणमपेक्ष्यते। शिक्षा सामाजिक-विकासार्थं प्रारूपं प्रस्तौति। सा समाजीयानि नैतिकमूल्यानि, समाजघटनानां क्षमतायाः स्थापनम्, नवयुवकानां भावुकां तार्किकीं च क्रियाशक्तिं निर्दिशति। शिक्षा व्यक्तेः समाजस्य पारस्परिकं च संतुलनं करोति। सा व्यक्तित्वं साक्षात्कारयति। समाजस्य विशालेश्वंगेषु तस्य व्यक्तित्वस्य स्थानं निर्धारयति च। एवं विधायां स्थापनायां समाजस्य व्यक्तेश्च स्वतन्त्रस्यास्तित्वस्य सुरक्षाप्यावश्यकी। अन्यथा द्वयोः व्यक्तिसमाजयोः तादात्म्यम्, अतिव्यक्तिवादः, अतिसमाजवादो वा पुर आयाति। वस्तुतः उभावपि परस्परं पूरकौ भवेताम्।

भारतीया शिक्षा गर्भाधानत एवारभ्यते। तत एवानुवंशिकतया वातावरणेन च समुचितं स्थानं लभते। यथोपनयनं व्यक्तेः पुनर्जन्म स्वीकृतमस्ति। अनेन व्यक्तिः परिवारे समाजे च स्वकीयं स्थानं परिज्ञातुं चेष्टते। अद्यत्वे तु त्रिवर्षादेव शिक्षा आरभते शिशोः, किन्तु शास्त्रे अष्टवर्षादेकादशवर्षाद् वा शिक्षा आरभ्यते इति **शांखायन**-गृह्यसूत्रे (2/183) उपादानम्। इत एवावस्थाया बालके कमपि विचारमंकयितुमवसरो लभ्यते। गर्भाष्टमेऽब्दे कुर्वीत द्विजस्योपनयनमिति शास्त्रवचनमनुसृत्य लाक्षणिकमेव विद्यार्थी गुरुकुलं प्रविशति स्म। गुरुकुलस्य नियमा आचारा व्यवहाराश्च बालकाय प्रायोगिकीं शिक्षां दातुमारभ्यन्ते। तेन संयमितं भोजनं कर्त्तव्यं भवति स्म। वेशभूषादि-विषयकमपि संयमनमासीत्तस्य कृते इति **मनुस्मृतौ** (2/177), गौतमधर्मसूत्रे (2/13), **आपस्तम्ब**धर्मसूत्रे (1/2/2/23), **याज्ञवल्क्य**स्मृतौ (1/32) विलिखितम्।

कथ्यते यत् पितृकुले लब्धसंस्कारो विद्यार्थी गुरुकुलस्य सदस्यतामाप्नोति स्म। गुरोः कर्त्तव्य -मासीद् यद् सोऽन्तेवासिनि पावित्र्यमुद्भावयेत्। आचार्यस्यान्तेवासितामधिगम्य छात्रस्तद्गुणच्छायया अनुग्रहीतो भवति स्म। इत्थं गुरुकुलपरम्परायां छात्रस्य कोमलायां चित्तभित्तौ वाचालतासम्पन्नस्य आचार्यस्य आचारः पदं निधत्ते। गुरुकुलस्य प्राकृतिकं वातावरणमेदतर्थं पृष्ठभूमिं प्रस्तौति। आचार्येण छात्रस्य कृते आध्यात्मिकपितृस्वरूपता ध्रियते स्म। आचार्योऽपि स्वकुटुम्बेऽन्तेवासिनि च न किमपि वैषम्यमाचरति। अत एव गुरुकुलशब्दः प्रयुक्तोऽस्ति।

विद्यायाः प्रतिपाद्यः ब्रह्मधर्मश्चासीत्।

आचार्यो विद्याद्वारा विद्यार्थिनोऽन्धकारात् प्रकाशमानयति। एतच्च विद्यार्थिन आचरणेन सेवया चैवासीत् सम्भवि। कीदृगपि शिक्षाशुल्कं नासीत्। फलत आर्थिकेषु आधारेषु कीदृग् वैषम्यं नाभूत्। आचार्योऽपि च स्वस्नेहेन विद्यादानं करोति स्म। अत एव स्तरनिर्धारणे न कीदृश्यपि प्रतियोगिता न वा रागद्वेषौ। अर्थमुद्दिश्य नासीद् विद्याध्ययनम्।

विद्याप्राप्तिविषये धैर्यमासीत्। एतेन विद्या सुपरिपक्वा भवितुमशकत्।

वस्तुतः धर्मेण ब्रह्मणा च सह विद्यायाः सम्बन्धाच्छात्रे इन्द्रियनिग्रहः, सदाचारः संयमश्चावश्यकाः। विद्वांस्तदैवासीद् आदरणीयो यदा तस्मिन् इन्द्रियनिग्रहः संयमो विनयः सदाचारश्च भवेयुः। विद्यार्थी न केवलमध्ययनार्थमेवाश्रमं गच्छत्यपितु स आश्रमे जीवनस्य व्यावहारिकान् विद्याया अंशान् शिक्षते। अत एव आचारहीनोऽध्यापको नाशकद् गुरुकुले स्थातुम्। आचार्यस्य कर्त्तव्यमासीद् यत् सः सांस्कृतिकीं नैतिकीं बौद्धिकीं च क्षमतां छात्राय निर्दिशेत्।

वस्तुतो विद्यालय एव एकमीदृशं स्थानं यत्र विद्यार्थी विद्यया सह चरित्रमपि शिक्षते। आचार्यो विद्यादाने न कीदृग् अपि कपटमाचरति स्म। सत्यव्याख्यानावसरे कीदृशमप्याग्रहं साम्प्रदायिकतां च दूरमपास्य याथातथ्यं चित्रयति स्म आचार्यः। स आसीदध्यापननिरतो यतोऽध्यापनं तस्य कर्त्तव्यमासीत्। विद्यार्थ्यपि कीदृशमपि पूर्वाग्रहमपसार्य स्वाध्यायमाचरति।

उक्तं शिक्षाधारानुसारं चरित्रनिर्माणम्, व्यक्तित्वविकासः, परम्पराया रक्षा इत्यादिकमासीच्छिक्षाया उद्देश्यम्। वेदज्ञानपरिपक्वोऽपि यदि न चरित्रसम्पन्नस्तदा तस्य न किमपि सामाजिकं मूल्यमासीद् इति मनुस्मृतौ 2/118 तमे निगदितम्। चरित्राहित्ये सति ज्ञानतपश्चर्यादेरपि न किमपि मूल्यम्। आध्यात्मिकविकासे चरित्रमेव सर्वस्वम् इति **मनुस्मृतौ** (2/97, 2/160) प्रोक्तम्। चरित्रनिर्माणार्थं ब्रह्मचारी गुरोः सविधे स्थाप्यते। अस्य प्रभावो राष्ट्रियचरित्रेऽपि भवति स्म। अद्यत्वे तु तथा नास्ति यत् शिक्षाप्राप्त्यनन्तरं यदि स मेधावी प्रमाणपत्रधारी चेदुराचारी अपि शिक्षकवृत्तिमवलम्ब्य अध्यापयितुं शक्यते, किन्तु तस्य परिणामः समाजे तथा न भवति यथाऽपेक्ष्यते।

वस्तुतः **शिक्षाया मुख्योद्देश्यं** चरित्रनिर्माणपूर्वकं व्यक्तित्वविकासः। प्रायेण कथ्यते यद् भारतीया अनुशासनादतिरेकेण विद्यार्थिनां व्यक्तित्वमेव समापयन्ति। सहैव शिक्षाया अतिरिक्तमुद्देश्यं स्व-स्वक्षमतानुसारं स्व-स्वरुच्यनुसारं च कलाकौशलादिषु व्यक्तेः विकासः। अतः आत्मसंयम-सम्पन्नो विद्यार्थी समाजे राज्ञोऽप्यधिकां प्रतिष्ठां लभते स्म। इह वातावरणे आत्मसम्मानः स्वयमुद्भवति। संस्काराणां पूर्णतायां विद्यार्थी आत्मविश्वासं लभते तथा च जीवनसम्बंधिषु व्यवहारेषु दैवीशक्तिमुद्भावयति।

वेदवेदांगादीनाम् अध्ययनं तथा च साहित्य-न्यायदर्शनादीनामध्ययनेन विद्यार्थिषु विवेकशक्तिः जागरिता आसीत्। एषा विवेकशक्तिः नागरिकतायाः गुणानां विकासे प्रयुज्यते स्म। एष प्रयत्न आसीद् यच्छात्रः स्वकीयेऽध्येये विषये नैपुण्यमधिगच्छेत्। तस्मात् स्वाध्यायाध्ययने तथा गुरोः प्रवचने सति विश्वासे छात्रे सम्बद्धायां शिक्षायां गाम्भीर्यमायाति सहैव विषयविशेषे विशेषज्ञतां लभते। सत्यमुक्तं याज्ञवल्क्यशिक्षायां (श्लोकः 106) यत्-

**यथा पिपीलिकाभिश्च क्रियते पांसुसंचयः।**
**न चात्र बलसामर्थ्यमुद्यमस्तत्र कारणम्।।**

अर्थात् कर्तृभिः पिपीलिकाभिः पांसूनाम् धूलीनां संचयनं क्रियते न तत्र बलसामर्थ्यम् किन्तु उद्यम एव कारणम्। तथैवैतेन शनैः शनैः किंचित्-किंचित् अधीता विद्या कालेन महती संचिता

भवतीत्युपदेशात् अभ्यासे उद्योग एव विधेयः न तु तत्र बलवत्ता अपेक्षिता इति सूचितम्।तथा च-

**शतेन गुणिताऽऽयाति सहस्रेण च तिष्ठति।**
**शतानां च सहस्रेण प्रेत्य चेह च तिष्ठति।।**

– याज्ञवल्क्यशिक्षा, वर्णप्रकरणे, 104

अत्र शतेन शतवारं गुणिता विद्या आयाति। साधकसाहाय्येन स्वीक्रियते। ततश्च सहस्रवारमावर्तिता सति तिष्ठति।बहुकाले यावत् धृता भवति।परं च शतानां सहस्रेण इति कथनेन लक्षाऽऽवर्तनेन च प्रेत्य अर्थात् अन्यस्मिन् जन्मनि चापि धृता भवति, इह चास्मिन् जन्मनि तु तिष्ठत्येव।

वस्तुतः शिक्षयानया मन्त्राणां पदवर्णमात्रास्वरादिज्ञानं वर्णोच्चारणविधिपरिज्ञानपूर्वकं स्थानादिपरिचयश्च भवति। तदा चात्र ऋग्वेदभाष्यभूमिकायां सायणाचार्यो लिखति-

**शिक्षां व्याख्यास्यामः।वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शिक्षाध्यायः।इति।।**

प्रातिशाख्येऽपि एते विषयाः विवेचिताः सन्ति। आधुनिकास्तु विचारकाः विषयेऽस्मिन् औदासीन्यं भजमानाः सन्ति। यद्यपि शास्त्रस्यास्य भूयान् सम्बंधः शिक्षाशास्त्रेण सह वर्तते इति। लिख्यन्ते तावत् वर्णस्वरादीनां प्रतिपाद्यविषयाः। वस्तुतः तेषामभिमतं विद्यते यत् षडंगान्तर्गतत्वं वैचित्र्यमावहति।उच्यते एकैकशः-

**वर्णः – उच्चारणीयाः अकारादिस्वराः व्यंजनानि च।**

**स्वरः – अकारादिस्वरवर्णधर्मा उदात्तादयः स्वराः।**

**मात्रा – उच्चारणकालः तदनुगता संज्ञा च।**

**बलम् – उच्चारणापेक्षितबाह्याभ्यन्तरप्रयत्नौ।**

**साम – अक्षराणां द्रुतादिवृत्तयः उत वा साम्येनोच्चारणम्।**

**सन्तानम् – प्रयोगे अध्ययनकाले वा समपेक्षितसन्धयः।**

एते शिक्षाप्रतिपाद्यविषयाः प्रातिशाख्यग्रन्थेषु संगता भवन्तीति एतस्मात् कारणात् प्रातिशाख्यशास्त्रं शिक्षान्तर्गतमिति विचारकाणामभिमतम्। अतः वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा इति ऋग्वेदभाष्यभूमिकायां 49 तमे पृष्ठे वर्णितं वर्तते। वस्तुतः शिक्षा स्वरवर्णोच्चारणं शास्त्रम्। अस्य वैदिकवाङमये समस्ति महत्वपूर्णं स्थानम्। वैदिकवाङ्मये शिक्षाशास्त्रस्य विशिष्टं स्थानं वर्तते। शास्त्रमिदं वेदाङ्गे घ्राणत्वेन वर्णितमस्ति। शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् इति।

अत्र इदमवधेयं भवति यत् प्रतिवेदम् उच्चारणशैल्याः किमपि वैशिष्ट्यं विद्यते, अतश्च तासां कृते विशेषनियमाः प्रतिपादिताः सन्ति। उच्चारणशैल्याः विभिन्नतायाः मूलस्रोतः ध्वनय एव। ध्वनीनां च मूलस्रोतः स्थानकरणप्रयत्नाः सन्ति। एषां पारस्परिकेण सूक्ष्मसंयोजनेन संघर्षतया च ध्वनिः वर्णत्वम् आपद्यते। वर्णेषु बाह्याभ्यन्तरपरिस्थितिवशात् विभिन्नवर्गाणां निष्पत्तिर्भवति। वर्गाक्षराणां पारस्परिक –सन्निकर्षतया ध्वनिपरिवर्तनं वर्णपरिवर्तनं वा भवति। निसर्गसिद्धस्यास्य ध्वनिविज्ञानस्य सन्धि–विज्ञानस्य च यादृग् विश्लेषणं प्रातिशाख्यग्रन्थेषु समुपलभ्यते तादृगन्यत्र दुर्लभमेव।

अतः शिक्षाम् अधिगम्य पुरा वेदानां

कण्ठस्थधारणपरम्परा न केवलम् अतीव सुदृढाऽऽसीद् अपितु स्वाधीतवेदग्रन्थस्य कण्ठस्थपारायणधारा ब्रह्मयज्ञरूपेण नियमिततया प्रवर्तिताऽऽसीत्। तत्र 'अहरहः स्वाध्यायमधीयीत' इति **शतपथब्राह्मणे** (11.05.06.03) वर्णितमिति। परवर्तिनि काले आश्रमव्यवस्थायाः शैथिल्यात् शास्त्रोक्तनियमपालने प्रमादवशात् मानवजीवनस्य भौतिकपदार्थानां- मुखतया च वेदग्रन्थानां संरक्षणे तदभ्यासे च कश्चन ह्रासक्रमः प्रादुर्बभूव।

आचार्यास्तु वैदिकमन्त्राणामुच्चारणे लेशमात्रमपि विपर्यासो माभूदिति धिया वर्ण-पद-सन्धि- स्वर-मात्रादि विषयकाणां विशिष्टनियमानां, पाठसुरक्षार्थं ग्रन्थरूपेण लेखनमावश्यकमेवेति कृतवन्तः। यद्यपि वेदमन्त्रलेखने प्रवृत्तिर्नासीत् किन्तु मन्त्राः न तिरोहिताः भूयासुः, तदर्थं कालान्तरे ग्रन्थ-सुरक्षार्थं लेखयामास। यतोहि भारतमातुः प्राणाः वेदाः। मातुः प्राणानां रक्षणाय चिरन्तनाः सततमुद्यता अभवन्। तद्रक्षणाय प्रथम उपायस्तु स्वाध्यायपूर्वक-मध्ययनमेव। तत्रापि अध्ययनम् गुरुमुखोच्चारणा-नूच्चारणमिति। यामानुपूर्वीमवलम्ब्य यथोच्चारयति तथैवाऽन्तेवासी अनूच्चारयेदिति प्रकारो वेदाध्ययन -परम्परा आसीत्। अन्तेवासिनामुच्चारणं गुरूच्चारण-सापेक्षं भवति। उच्चारणसौष्ठवं तदैव निश्चितं भवति यदा गुरूच्चारितानुपूर्वीसदृशानुपूर्वीं शिष्य उच्चारयेत्। अतः शिष्योच्चारणे गुरूच्चारणसापेक्षता अस्ति। गुरूच्चारणमपि स्वगुरूच्चारणसापेक्ष-मेवासीत्, तस्यापि गुरोः स्वगुरूच्चारणसापेक्षता एवेति पूर्व-पूर्वगुरूच्चारणसापेक्षोच्चारणमेव शिष्येषु सिध्यति शिक्षायतनस्य आयामः। अतः गुरुभिः स्वाध्यायपरकी शिक्षा बलवती आसीत्।

पुराकाले विद्यायाः आधारस्तम्भो गुरुरासीत्। य आचार्योपाध्यायादिभिः विभिन्नैः नामभिः व्यपदिश्यते स्म। प्राचीनसमये पित्रापि शिक्ष्यते स्म पुत्रः, किन्तु गुरुकुल एव विद्याध्ययनस्य एकमात्रं स्थानमासीदधिकं प्रचलितम्। **छान्दोग्योपनिषदि** वर्णितं यत् श्वेतकेतुः स्वपित्रा गुरुसविधे प्रेषितो विद्यामध्येतुम्। अस्यामेवोपनिषदि (03.11.05) एतन्निर्दिष्टं यत् पित्रा ज्येष्ठपुत्रो योग्यशिष्यो वा मधुविद्यामध्यापनीयः। पुरा यस्य पिता विद्यते स एव तस्याचार्यः। पितैवोपनयेत् पुत्रमिति धिया स्मृतिवचनाच्च आचार्यान्तरोपादानेन पितुरधिकारो निवर्तत एव, किन्तु **विष्णुधर्मसूत्रे** (30/34) गुरोः पितृतुल्यता प्रतिपादिता वर्तते। गुरुरपि च पितृपदेनैव व्यपदिष्टः, तत्र पिता आचार्यः योऽध्यापयेद् वेदविद्यां स जनकादधिकं श्रद्धेयः। पठ्यते कुत्रापि-दशगुणादधिकमाचार्यस्य, आचार्यात् शतगुणादधिकं पितुः, पितुश्च सहस्रगुणाधिक्यं मातुर्महत्वं मन्यते इति।

अस्तु शिक्षायतने प्रयत्ने गुरोर्महत्त्वं पुराकालादेव वरीवर्ति। यदसौ बालकं सदाचारं बोधयति, बुद्धिं संग्राहयति, शौचनियमान् आचार-विचारान् समाजिकतायां मतिं चोद्दीपयति च। अद्यत्वे न तथा दृश्यते परिकल्पना च क्रियते। निश्चप्रचमेव विद्याकालस्य ह्रासो तु जायत एव। शिक्षायाः प्रतिपाद्यविषयः सर्वांगतया कस्यामपि शिक्षायां प्रविष्टः सन् तत्र शास्त्रप्रयोजनमनुभूय प्रामाणिकत्वेन तत्त्वचिन्तनम् इति। भवतु नाम वर्णोत्पत्तिचिन्तनम्, शब्दोत्पत्तिचिन्तनम्, स्वरसन्धिनियमादिचिन्तनम्, आख्यातोपसर्गपदानां चिन्तनपूर्वकं पदस्वरूप-चिन्तनम् इति। सर्वत्र वर्णसमाम्नायात्

अवसानाक्षरपरिग्रहनियमान् जानीयात्।

विषयवस्तुदृष्ट्याऽपि किंचिद्वैशिष्ट्यमनुभूयते शिक्षणाभ्यासे। स च न केवलमेतावदेव अपितु आधुनिकज्ञानविज्ञानविषयेऽपि पदार्थज्ञाने च पुनःपुनरावृत्तिपरकी शिक्षणपरम्परा स्वाधीत-लेखनस्य अभ्यासः ब्रह्मयज्ञरूपेण नियमिततया प्रवर्तिता भवेदिति। कतिपये आधुनिकाः विद्वांसोऽपि मन्यन्ते यत् कण्ठस्थधारणपरम्परा विद्या न केवलं सुदृढा अपितु चिरकालपर्यन्तं संरक्षणे सुरक्षिता भविष्यति।

- सहायकाचार्यः शुक्लयजुर्वेदे
राजकीयशास्त्रीसंस्कृतमहाविद्यालयः,
कालाडेरा, जयपुरम्
मो0 9414480988

---

**संस्कृतसमाचारः**

## सम्मानिता देवर्षि-कलानाथशास्त्रिणः

राजस्थाने सीकरमण्डलान्तर्गत-रैवासाधाम-स्थाने 29.10.2023 दिनाङ्के अग्रपीठाधीश्वर-स्वामि-राघवाचार्यमहोदयानां सान्निध्ये राष्ट्रीयस्वयंसेवक-संघस्य **पूर्व सरकार्यवाह**-माननीय सुरेश भैयाजी जोशी, उज्जैनस्थ महर्षि-सान्दीपनी-राष्ट्रिय-वेदविद्याप्रतिष्ठानस्य **सचिव**-प्रोफेसर विरूपाक्ष वि. जड्डीपाल, श्री जानकीनाथ बडा मन्दिर ट्रस्ट-रेवासाधाम्न **उपाध्यक्ष** श्री आशिष् तिवाडी महोदयैः श्रीजानकीनाथ-वैदिकनिकेतनस्योद्घाटनं विहितम्।

समारोहेऽस्मिन् भारती-पत्रिकाया प्रधान-सम्पादको देवर्षि-**कलानाथशास्त्रिमहोदयः** श्रीनाभादासभक्तिसाहित्यपुरस्कारेण सभाजितः, अथ च आचार्य-**श्रीनन्दनमिश्रः** वेदमूर्तिश्रीगोविन्द-शास्त्रिघोडेकर पुरस्कारेण सम्मानितः। वर्धापनार्हावेतौ विद्वांसौ। विश्वस्मिन् जगति भारतवर्षमेतादृशं राष्ट्रमस्ति यज्वनानां हृदयेषु स्वकीयैस्सुचरितैस्तिष्ठति, न तु बलादन्येषां राष्ट्राणां सम्पदः स्वायत्तीकरोति, यतो 'मातृवत् परदारेषु परद्रव्येषु लोष्ठवदि' ति भारतीयसंस्कृतेरादर्शः- इत्येवम् उदबोधयत् श्रीसुरेशभैय्याजी जोशि-महोदयः। कार्यक्रमेऽस्मिन् राज्यसभासांसद-**श्रीघनश्याम-तिवाडी**प्रमुखा गण्यमान्याः शिष्टजनाः सन्तश्च विराजिता आसन्।



*स्वामि-राघवाचार्यमहोदयानां करकमलाभ्याम् अभिनन्दनपत्रं गृह्णन्तो देवर्षि-कलानाथशास्त्रिणः*

- सम्पादकः

पुस्तक-समीक्षा

# गजलगीतिसङ्ग्रहः कथापत्रिका च

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

गतेषु मासेषु भारत्याः पाठकैर्ग़ज़लगीतीनां प्रवाहोऽपि वीक्षितः स्यात्, ग़ज़लगीतिपुस्तकानां समीक्षाऽपि पठिता स्यात्। अस्मिन्नेव क्रमे कविसार्वभौमस्य सुप्रथितस्य कविवर्यस्य अभिराजराजेन्द्रमिश्रस्य ग़ज़लगीतिसंग्रहः 'औदुम्बरी' नामवहो दृष्टावागतो यस्मिन् 68 गजलगीतयः संगृहीताः सन्ति। 2012 ई. वर्षत आरभ्य 2015 ई. वर्षं यावल्लिखिता गजलगीतयोऽस्मिन् संग्रहे हिन्द्यनुवादेन सह मुद्रिताः सन्ति। यस्मिन् पृष्ठे संस्कृतग़ज़लगीतिर्मुद्रिता तत्सम्मुखीने पृष्ठे तस्या हिन्द्यामनुवादो मुद्रितः, सहैव गीतिप्रणयनस्य कालखण्डः, लेखनस्थलम्, दिनाङ्कश्चापि गीतेरधस्तान्मुद्रिताः।

ग़ज़लगीतीनां शीर्षकमप्यत्र प्रतिग़ज़लं मुद्रितमस्ति। उर्दूसाहित्यपरम्परायां ग़ज़लगीतेः शीर्षकं सामान्यतो न दृश्यते यतो हि तत्र सेयं धारणा यत्समग्राया गीतेरेकं किञ्चन कथ्यं न भवति, प्रतिचरणं किञ्चन कथां समुदेति। अस्मिन् संग्रहे तत एव गीतेः शीर्षकं समग्रस्य कथ्यस्याधारेण न सूचितम्, गीतेः कश्चन पद्यांश एव शीर्षकरूपेण मुद्रितः, यथा 'विधे! कुर्यामहं किम्?' 'संस्कृतज्ञो न को जायते सव्यथः?' 'सम्प्रति विधे! क्व यानि' इत्यादि। ग़ज़लगीतीनां लयवैविध्यं, शैलीलालित्यं नावीन्यं च कविवर्यस्यास्य प्रकृतेरनुरूपं सर्वत्र दृश्यते इति कथनस्य नाऽस्त्यावश्यकता। प्रसादगुणः सर्वासु गीतिषु पाठकानाकर्षतीति किं विवरणेन?

गीतिसंग्रहस्य शीर्षकम् 'औदुम्बरी' एकस्या गीतेः शीर्षकमादाय निर्धारितमस्ति। औदुम्बरी वनिका (उदुम्बराणाम् उद्यानिका) सर्वत्र न दृश्यते साम्प्रतिके समये किन्तु वेदकालीनस्य स्वादिष्टस्य वनस्पतेः (गूलर इति हिन्दीभाषायां वर्णितस्य) प्रशंसा प्राचीने साहित्ये परिदृश्यते- **'चरन् वै मधु विन्देत चरन् स्वादुमुदुम्बरम्'** इत्यादि सुप्रथिता उक्तयः। पुस्तकस्य प्रारम्भे कविवर्यस्य 'नान्दीवाक्' तु मुद्रितैव, जोधपुरीय-जयनारायणव्यासविश्वविद्यालयीयसंस्कृतविभागीयाया विदुष्याः प्रो. सरोज कौशलवर्यायाः समीक्षात्मिका भूमिकाऽपि हिन्द्यां मुद्रिताऽस्ति।

**औदुम्बरीः** कविः प्रो. अभिराज राजेन्द्र मिश्र, प्रकाशक वैजयन्त प्रकाशन, 8, बाघम्बरी मार्ग, भरद्वाजपुर (अल्लापुर), इलाहबाद (प्रयागराज), पृ.सं. 160, मूल्यम् 500/-

# कथापत्रिका कथासरित्

संस्कृतस्य समकालिककथानां प्रसारयित्री षाण्मासिकी पत्रिका **'कथासरित्'** सुविदिताऽस्ति संस्कृतजगति। भारतीपत्रिकायां पत्रिकाया अस्याः समीक्षाः प्रकाशितचरा बहुवारम्। अस्याः षट्त्रिंशस्तरङ्गः (36) सपद्येव प्रकाशमासो यः खलु बालकथाविशेषाङ्करूपेण प्रकाशयितुमिष्टोऽस्तीति

प्रतीयते। अस्मिन् 'बालकथा विशेषतरङ्गे' प्रायः पञ्चविंशतिसंख्याका बालकथाः प्रकाशिताः सन्ति। अन्या सामग्री (यथा धारावाहिककथाः, अनूदितकथाः, समीक्षाः, समाचाराः) तु यथावत् प्रकाशितैव।

बालकथासु हर्षदेव माधव-प्रवीण पण्ड्या-पूर्णचन्द्र-उपाध्याय-बुद्धेश्वर षडङ्गी-नारायणदाश प्रभृतीनां कथाः सन्ति, अन्यसामग्रीमध्ये राष्ट्रपति-सम्मानितस्यायुर्वेदविश्वविद्यालयकुलपतिचरस्य प्रसिद्धस्य विदुषो बनवारीलालगौडस्य 'आयुर्वेद-कथाद्वयं' विशेषत उल्लेखमर्हति यत्र सुप्रथितस्य महर्षेर्दधीचेरङ्गसमर्पणमादाय, विश्पलाख्या महिष्या जङ्घाभङ्गस्य चिकित्सार्थं तस्यै लौहजङ्घाया योजनमश्विनीकुमाराभ्यां कृतं चादाय विस्तृतं कथाद्वयं गौडमहाभागस्य 'आयुर्वेदक-थाष्टकात्' परिगृहीतं विशेषतो ध्यानमाकर्षेत्। अत्रहि लेखकवर्यस्य नाम्नः संस्कृतीकरणमपि (बनवारिलालगौड़रूपेण) सम्पादकवर्यैः कृतमस्ति दर्शनीयम्।

बालकथासु भाषान्तरेभ्योऽनूदिता बालकथा अपि सन्ति (अनूदिताः कथा अत्र 'अनुसृष्टाः कथाः', अनुवादश्च 'अनुसर्जनम्' इति, अनुवादकश्च 'अनुसर्जक' इति पदेनभिहिताः), धारावाहिकथा अपि सन्ति। ऋषिराज जानिवर्यस्य धारावाहि-कथारूप उपन्यासः 'अन्तरिक्षयोधाः' इत्याख्यो यथाक्रममत्र मुद्रितो दृश्येत। के.एम.मुन्शीवर्यस्य धारावाहिकथा 'कृष्णावतारः' गोपबन्धुमिश्रेणा-नूदितः प्रकाशितोऽस्ति यो यथाक्रममनुवर्तेत। पत्रिकाया मुखपृष्ठे एतस्या अभिधानं 'समकालिक कथानाम् अद्वितीया षाण्मासिकी' इति मुद्रितमस्ति। एतस्या इयमद्वितीयता सुतरामभिनन्दनार्हा।

**कथासरित्** (षाण्मासिकी पत्रिका), सम्पादकौ: वनमाली विश्वासः, नारायणदाशश्च, सहसम्पादकः राकेशदाश, सम्पादनप्रबन्धकः जयदेव टिण्डा, **प्रकाशिका**- कथाभारती, कोलकाता, ए-112, नर्मदा कॉम्प्लेक्स, ग्रीन पार्क, नरेन्द्रपुर-700103

हार्दिक शुभकामनों सहित :-
निर्माता
ए इन्फ्रास्ट्रक्चर लिमिटेड
एस्बेस्टोस सीमेन्ट पाइप्स
सस्ता, मजबूत एवं टिकाऊ
सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
एवं
निर्माता
एस्बेस्टोस सीमेन्ट शीट्स
छत एक, लाभ अनेक
उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें
कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

नारी-स्तम्भः

# गुणान्वितासु नित्यं वसामि

❑ डॉ. राजेश्वरी भट्टः

भारतदेशे नारी लक्ष्म्याः प्रतिमूर्तिरिव सम्मान्यते। कन्या-पत्नी-माता इति तिसृष्ववस्थासु नारी लक्ष्मीरिव अभिनन्दनीया वर्तते। कन्याजन्मसमये परिजनाः परिचिताः समागताश्च 'गृहे लक्ष्म्या आगमनं जातम्' इति कथयित्वा हर्षोद्गारान् प्रदर्शयन्ति। विवाहानन्तरं नववधू-रूपे नारी पतिगृहं प्रविशति तदा तस्याः गृहप्रवेशो लक्ष्म्याः प्रवेशवत् महता समारोहेण सभाज्यते एवमेव यदि गृहे कस्यापि महिलाया निधनं भवति तदा गृहलक्ष्मीं विना गृहं शून्यमिव प्रतिभाति इति कथयित्वा सम्बन्धिनः सहृदयाश्च शोकं प्रदर्शयन्ति। अनेन स्पष्टमस्ति यत् निःसन्देहं नारीषु लक्ष्मीनिवासः। किं विशिष्टगुणसम्पन्नासु नारीषु लक्ष्म्या निवासो नारीमात्रेषु वेति विचारणायां कृष्णस्य सन्निधावुपविष्टा देवी रुक्मिणी लक्ष्मीमपृच्छत् यत् सा कीदृशीषु नारीषु चिरस्थितिं करोति काश्च विहाय गच्छति। लक्ष्म्या वचनैर्ज्ञायते यत् या नार्यो गृहस्य पर्यावरणपरिवेशयोः स्वच्छतायै सावहिता भवन्ति। देव-द्विज-अतिथीनां सेवायै तत्पराः सन्ति, भाण्डानि स्वच्छीकुर्वन्ति, गोसेवायै समर्पिता वर्तन्ते, तासु नारीषु लक्ष्मीः सदा वसति।

कथितञ्च -

वसामि स्त्रीषु कान्तासु, देवद्विजपरासु च।
विशुद्धगृहभाण्डासु, गोधान्याभिरतासु च।।
(महाभारते, अनुशासनपर्व, 11.10)

लक्ष्मीः सत्यवादिनीनां नारीणां चिरसहचरी वर्तते। सौम्यदर्शनयुक्तासु, समुचितवेशभूषा-भूषितासु, भर्तुर्मनोवृत्तानुसारिणीषु अनेकगुणान्वितासु नारीषु लक्ष्म्याः चिरनिवासो भवति। कथितञ्च -

सत्यासु नित्यं प्रियदर्शनासु
सौभाग्ययुक्तासु गुणान्वितासु।
वसामि नारीषु पतिव्रतासु,
कल्याणशीलासु विभूषितासु।।
(महाभारते, अनुशासनपर्व, 11.13)

लक्ष्म्यै गृहकार्याण्युपेक्षयन्ती स्वच्छतां प्रति उदासीना, अव्यवस्थिताचारव्यवहारविचार-युक्ता, भर्तुर्हितमवधीरयन्ती, अविचार्य एव कर्मसु प्रवृत्ता निरुद्देश्येन यत्र तत्र अटन्ती नारी कथमपि न रोचते। अस्मिन् प्रसंगे लक्ष्म्या कथितानि वचनानि द्रष्टव्यानि सन्ति -

प्रकीर्णभाण्डामनवेक्षकारिणीं,
सदा च भर्तुः प्रतिकूलवादिनीम्।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां तां परिवर्जयामि।।

(महाभारतं, अनुशासनपर्व, 11.11)

लक्ष्मीः ताभ्यो दुर्गुणयुक्ताभ्यो नारीभ्यो दूराद्दूरतरं गच्छति याः पापकर्मसु लिप्ता, बहुभक्षिण्यो, धैर्यविहीनाः कलहप्रियाः निद्रया गृहीताः सन्ति। कथितञ्च -

पापामचोक्षामवहेलिनीं च,
व्यपेतधैर्यां कलहप्रियां च।
निद्राभिभूतां सततं शयाना-
मेवंविधां तां परिवर्जयामि।।
(महाभारतं, अनुशासनपर्व, 11.12)

लक्ष्मीपूजनमहोत्सवे सुख-समृद्धि-सौभाग्यकांक्षिणीभिः नारीभिः लक्ष्म्याः पूजनेन सह तस्या मुखनिर्गतानि अमृतमयवचनान्यपि

स्मरणीयानि। श्रेयस्कराणि वचनानीमानि युगयुगेभ्यः प्रेरणाप्रदानि सन्ति।

## हिन्दी अनुवाद

भारतदेश में नारी लक्ष्मी की प्रतिमूर्ति की भाँति सम्मानित है। कन्या, पत्नी, माता इन तीनों रूपों में ही नारी लक्ष्मी के रूप में अभिनन्दनीय है। कन्या के जन्म होने पर परिजन, परिचित एवं समागत जन 'घर में लक्ष्मी का आगमन हुआ है' ऐसा कहते हुए अपने हर्षोद्गार प्रगट करते हैं। विवाह के पश्चात् जब नववधू पति के साथ घर में प्रवेश करती है तब पति के घर में उसका प्रवेश लक्ष्मी के प्रवेश के समान बड़े समारोह के साथ सम्पन्न किया जाता है। इसी प्रकार यदि घर की किसी महिला की मृत्यु हो जाती है तो 'गृह लक्ष्मी के बिना घर सूना हो गया' ऐसा कहकर परिजन अपना शोक प्रकट करते हैं। इससे स्पष्ट ज्ञात होता है कि निःसन्देह नारियों में लक्ष्मी का निवास है। किन्तु सभी नारियों में लक्ष्मी निवास करती है अथवा विशिष्टगुण सम्पन्न नारियों में लक्ष्मी का चिर निवास है तथा किन स्त्रियों को छोड़कर वह पलायन कर जाती है। इस बात को जानने की इच्छुक श्रीकृष्ण के समीप बैठी हुई देवी 'रुक्मिणी जी' ने लक्ष्मी जी से पूछा कि वे किन स्त्रियों में सदा निवास करती है तथा किन को छोड़कर चली जाती हैं। लक्ष्मी के वचनों से ज्ञात होता है कि वे उन नारियों में सदा निवास करती हैं जो नारियाँ गृह के पर्यावरण तथा परिवेश की स्वच्छता के प्रति सचेत रहती हैं, देव, ब्राह्मण एवं अतिथियों की सेवा में तत्पर रहती हैं, घर के बर्तनों को स्वच्छ रखती हैं, गो सेवा के लिए तत्पर हैं- ऐसी नारियों में ही लक्ष्मी का सदा निवास है। कहा गया है- 'मैं सुन्दर स्त्रियों में, देवता ब्राह्मण एवं अतिथियों के सत्कार में समर्पित घर के बर्तनों को शुद्ध रखने वाली तथा गाय की सेवा, धान्य की रक्षा करने वाली स्त्रियों में सदा निवास करती हूँ। - (महाभारत का अनुशासन पर्व)

लक्ष्मी सत्यवादिनी नारियों की सहचरी है। सौम्य दर्शनयुक्त, समुचित वेशभूषा से भूषित अपने पति के अनुकूल रहने वाली तथा अनेक गुणों से युक्त कल्याणकारिणी स्त्रियों में लक्ष्मी सदा-निवास करती है। - (महाभारत का अनुशासन पर्व)

घर के कार्यों की उपेक्षा करने वाली, स्वच्छता के प्रति उदासीन, अव्यवस्थित आचार-विचार व्यवहार वाली पतिहित को न समझने वाली, बिना विचारे कार्यों में प्रवृत्त होने वाली, बिना उद्देश्य इधर-उधर भटकने वाली नारी लक्ष्मी को तनिक भी पसन्द नहीं है। इस प्रसंग में लक्ष्मी स्वयं कहती है - घर के बर्तनों को अव्यवस्थित रखने वाली, पति के प्रतिकूल चलने वाली, लज्जाहीन, बिना कार्य इधर-उधर घूमने वाली नारी को मैं छोड़ देती हूँ। - (महाभारत का अनुशासन पर्व)

लक्ष्मी दुर्गुणों से ग्रस्त उन नारियों से दूर चली जाती है जो पापकर्म में लिप्त हैं, चटोरी हैं, धैर्य विहीना हैं, क्लेशकारिणी एवं निद्रा के वशीभूत हैं। कहा भी गया है - पाप में प्रवृत्त, चटोरी, विगतधैर्या कलहप्रिया निद्रा से गृहीत लक्षण वाली नारियों को मैं त्याग कर चली जाती हूँ। - (महाभारत का अनुशासन पर्व)

लक्ष्मीपूजन महोत्सव पर सुख, समृद्धि एवं सौभाग्य की कामना करने वाली नारियों को लक्ष्मी के पूजन के साथ-साथ उनके मुख से निकले हुए अमृततुल्य वचनों का भी स्मरण करना चाहिए। लक्ष्मी द्वारा कहे हुए कल्याणकारी वचन युगयुगों तक प्रेरणादायी हैं।

**- पूर्व-संस्कृतविभागाध्यक्षा,**

**लालबहादुर-शास्त्री कॉलेजः, जयपुरम्।**

आयुर्वेद-स्तम्भः

# भो दीप! सुस्थिरो भव

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**उत्सवप्रधानोऽयं देशो भारतवर्षः। नियताह्लादजनकव्यापारो ह्युत्सवः, उत्सवे हि हर्षस्यानन्दस्यामोदस्य प्रमोदस्य चावसरः मिलति। उत्सवस्तु क्षणोति दुःखम् अस्मात्कारणात् क्षण इति नाम्नापि ज्ञायते. वस्तुतस्त्वेष उत्सुवति प्रेरयति अत एव उत्सव इति नाम्ना सञ्ज्ञितः।**

यह देश भारतवर्ष निश्चित रूप से उत्सवप्रधान है। नियत प्रसन्नता उत्पन्न करने वाला व्यवसाय (कार्य, संलग्नता) उत्सव होता है। उत्सव में हर्ष का, आनंद का, आमोद का और प्रमोद का अवसर मिलता है। उत्सव तो दुःख को नष्ट करता है इस कारण क्षण इस नाम से भी जाना जाता है, वस्तुतः यह प्रेरित करता है इसलिए उत्सव इस नाम से इसकी संज्ञा की गई है।

**शरीरं पञ्चमहाभूतविकारात्मकमात्मनो भोगायतनम्, अत्र हीन्द्रियाणि चक्षुरादीनि, सत्त्वं, ज्ञानप्रतिसन्धाता आत्मा च तिष्ठन्ति, शरीरे ह्येतेषां सम्यगदृष्टयन्त्रितो योगोऽस्ति। इन्द्रियाणि सत्त्वम्आत्मा चेदंभौतिकं शरीरमाश्रित्य तिष्ठन्त्यन्तःभागे। आत्मा त्वत्र निर्विकारत्वेन तिष्ठति। शरीरे त्वात्मा चेतयिता परं न तु साक्षात्क्रियावान्। आत्माधिष्ठितस्यैव मनसः क्रिया उपचारादात्मनः क्रियेत्युच्यते। चेतनेन ह्यात्मनाऽधिष्ठितं मनःक्रियासु प्रवर्तते, चेतनानधिष्ठितं तु मनः क्रियासु न प्रवर्तते। किन्त्वेतन्मनस्तु चञ्चलमस्त्यत एव शीघ्रमेव रागद्वेषादिभिर्युज्यते।**

शरीर पञ्चमहाभूतविकारात्मक है जो आत्मा के भोग का स्थान (आवास) है, इसमें चक्षु आदि इंद्रियाँ हैं, मन है और ज्ञान का प्रतिसंधान करने वाला (ज्ञान को एकत्र करने वाला) आत्मा है,शरीर में इन सब का नहीं दिखाई देने वाला सम्यक् प्रकार से नियंत्रित करने वाला (बाँधे रखने वाला) योग (संयोग) है। इंद्रियाँ, मन और आत्मा ये सब इस भौतिक शरीर को आश्रित करके अंतःभाग में स्थित रहते हैं। आत्मा तो यहाँ पर निर्विकार भाव से स्थित रहता है, शरीर में तो आत्मा चैतन्य उत्पन्न करने वाला हैं लेकिन साक्षात् रूप से वह क्रियावान् नहीं है। आत्माधिष्ठित मन की क्रिया ही व्यवहार में आत्मा की क्रिया है ऐसा कहा जाता है। चेतनावान् आत्मा से अधिष्ठित (आत्मा की प्रधानता में स्थित) मन क्रियाओं में प्रवृत्त होता है। जिस मन का चेतनावान् आत्मा अधिष्ठाता (प्रधान) नहीं है ऐसा मन क्रियाओं में प्रवृत्त नहीं होता है, किंतु यह मन तो चंचल है इसलिए शीघ्र ही राग-द्वेष इत्यादि से संयुक्त हो जाता है।

**शरीरे दोषात्मकाः वातपित्तकफाः विकृतिकारका भवन्ति, शरीरविकारास्तु ज्वरादयः सन्ति। मनसि तु रजश्च तम एव च मानसो दोषसङ्ग्रहः। तयोर्विकाराः कामक्रोध-लोभमोहेर्ष्यामानमदशोकचित्तोद्वेगभयहर्षादयः।**

शरीर में दोषस्वरूपक वात, पित्त और कफ विकृतिकारक होते हैं, शरीर के विकार तो ज्वर आदि हैं, रजस् एवं तमस् तो संक्षेप में मानस दोष हैं, इन दोनों के विकार तो काम, क्रोध, लोभ, मोह, ईर्ष्या, मान, मद, शोक, चित्तोद्वेग (चित्त का क्षोभ), भय एवं हर्ष इत्यादि हैं।

**वर्तमानकाले हि जनाः मदेन (राजमद-धनमद-वयोमदेत्यादिभिः) ग्रस्ताः, अनुकूल-शिक्षाप्राप्त्यर्थं प्रवेशपरीक्षाध्ययने व्यस्ताः, प्रतियोगिपरीक्षासु दत्तचित्ताः, शिक्षासमाप्त्य-नन्तरं कार्यहीनत्वेन त्रस्ताः, ततः पारिवारिक-जीवने स्रस्ताः,केचित् स्वव्यवसायेऽन्यसेवायां नियुक्ताः वा जनाः कार्यस्थलेऽपि नियतकार्यतः विरक्ताः निरताः वा चलदूरभाषयन्त्रमाध्यमे-नान्तर्जालात् सम्प्राप्तं ज्ञानमितस्ततः प्रेषणेऽस्त-व्यस्ताः, प्रदूषिते पर्यावरणेऽभ्यस्ताः, संयुक्तपरिवारप्रणालीतः दूरे न्यस्तास्तथा केचिज्ज्ञानलवदुर्विदग्धाःसर्व एव जनाःकाम-क्रोधलोभमोहादिभिर्मनोविकारैर्ग्रस्ताः भवन्ति, विशेषेण त्ववसादोऽतिक्रियत्वं वा दृश्यते युवजनेषु, तत्प्रभावप्रभावितास्तु ते आत्महत्यां कुर्वन्ति परहत्यां वा कुर्वन्ति। अथवा विभिन्नैर्मनोविकारैर्ग्रस्तास्ते कामक्रोधलोभ-मोहेर्ष्यादिभिराविष्टाः किमप्यकार्यं कुर्वन्ति।**

वर्तमानकाल में लोग मद से (राजमद-धनमद-वयोमद इत्यादि से) ग्रस्त, अनुकूलशिक्षा प्राप्ति के लिए प्रवेशपरीक्षा के अध्ययन में व्यस्त, प्रतियोगिपरीक्षाओं में लगे हुए, शिक्षासमाप्ति के बाद बेरोजगारी से त्रस्त, उसके बाद पारिवारिक जीवन से शिथिल हुए, कुछ अपने व्यवसाय में अथवा अन्य किसी भी सेवा में नियुक्त लोग कार्यस्थल पर भी नियत कार्य को छोडे हुए अथवा उस कार्य में लगे हुए मोबाइल के माध्यम से इंटरनेट से प्राप्त ज्ञान को इधर-उधर भेजने में अस्त व्यस्त, प्रदूषित पर्यावरण में अभ्यस्त, संयुक्त परिवारप्रणाली से दूर रखे गए तथा कुछ ऐसे लोग जो थोड़े से ज्ञान से दुर्विदग्ध हैं( अपने आप को बड़ा विद्वान् समझते हैं) ऐसे सभी लोग काम-क्रोध-लोभ-मोहादि मनोविकारों से ग्रस्त हो जाते हैं, विशेष रूप से तो युवाओं में अवसाद अथवा अतिक्रियाशीलता देखी जाती है, उसके प्रभाव से प्रभावित हुए वे या तो आत्महत्या करते हैं अथवा दूसरे की हत्या करते हैं । अथवा विभिन्न मनोविकारों से ग्रस्त वे लोग काम, क्रोध, लोभ, मोह, ईर्ष्यादि से पीड़ित हुए अकरणीय कुछ भी कर देते हैं।

**मानसविकाराणाम्प्रति भैषज्यं तु त्रिवर्ग-स्यान्ववेक्षणं प्रमुखरूपेण निर्दिष्टम्। क्रमेऽस्मिन्नाचार्यश्चरकः कथयति यत्-**

**तत्र बुद्धिमता मानसव्याधिपरीतेनापि सता बुद्ध्या हिताहितमवेक्ष्यावेक्ष्य धर्मार्थकामा-नामहितानामनुपसेवने हितानां चोपसेवने प्रयतितव्यं, न ह्यन्तरेण लोके त्रयमेतन्मानसं किञ्चिन्निष्पद्यते सुखं वा दुःखं वा। (च.सू.11/46) धर्मार्थकामानां हितानामुपसेवने मन्त्रौषधिमणिमङ्गलबल्युपहार-होमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपात-देवार्चनादीनां वैशिष्ट्यं वर्तते।**

बुद्धिमान् मनुष्य मानस व्याधि से पीड़ित हो जाने पर भी अपनी बुद्धि से हित और अहित को देख-देख कर (विचार कर) अहितकर धर्म, अर्थ

और काम के अनुपसेवन में (सेवन न करने में) और हितकर धर्म, अर्थ और काम के सेवन में प्रयत्नशील रहे, क्योंकि निश्चय ही इस संसार में धर्म, अर्थ और काम इन तीनों के बिना मानस सुख या दु:ख उत्पन्न नहीं हो सकता। हितस्वरूप धर्म अर्थ और काम के उपसेवन में मंत्र, औषधि,मणि, मङ्गल,बलि, उपहार, होम, नियम, प्रायश्चित्त, उपवास, कल्याणकारी मार्ग (या कार्य), प्रणिपात (प्रणाम करना) एवं देवार्चन इत्यादि का वैशिष्ट्य है।

**मानसविकाराणामपवारणे निवारणे च मानसो ज्ञानविज्ञानधैर्यस्मृतिसमाधीत्यादीनां महत्प्रभावो वर्तते। ज्ञानमध्यात्मज्ञानरूपेण ज्ञायते, विज्ञानं शास्त्रज्ञानं तथा धैर्यमनुन्नतिश्चेतस इति ज्ञायेते (धैर्यं विपद्यपि मनसोऽदैन्यम्), स्मृतिस्त्वनुभूतार्थस्मरणं भवति, विषयेभ्यो निवर्त्यात्मनि मनसो नियमनम् इति विशिष्टक्रियात्मकस्तु समाधिः। समाधिव्यतिरिक्तानामन्येषां संसिद्धिस्तु येन केनापि माध्यमेन समुत्पन्नेन हर्षेण जायते,प्रीतिस्तोषमात्रं, हर्षस्तु प्रीतिविशेषोऽस्ति।**

मानस विकारों के अपवारण में बचाव में एवं निवारण में ज्ञान, विज्ञान, धैर्य, स्मृति एवं समाधि इत्यादि का अत्यधिक प्रभाव है। ज्ञान अध्यात्मज्ञानरूप से जाना जाता है, विज्ञान शास्त्रज्ञान एवं धैर्य चित्त का उद्वेलित न होना इस रूप में जाने जाते हैं (विपत्ति में भी मन का दीन भाव में नहीं होना धैर्य है), स्मृति तो अनुभूत विषयों का स्मरण होता है, विषयों से निवृत्त करके मन का आत्मा में नियमन होना इस प्रकार की विशिष्ट क्रियास्वरूप तो समाधि है। समाधि के अतिरिक्त अन्य सब की संसिद्धि तो जिस किसी भी माध्यम से उत्पन्न हर्ष से हो जाती है, प्रीति संतुष्टिमात्रहै और हर्ष तो प्रीतिविशेष है।

**अग्निं जरणशक्त्यापरीक्षेत, बलं व्यायामशक्त्यापरीक्षेत, श्रोत्रादीनि शब्दाद्यर्थग्रहणेन परीक्षेत, एवमेव हर्षमामोदेन परीक्षेत। उत्सवे त्वामोदो भवत्येव, हर्षस्योत्पत्तिस्तूत्सवेन जायते।अत एव जीवने उत्सवास्त्वपरिहार्याः।**

भोजन को जीर्ण करने की शक्ति से जठराग्नि का परीक्षण करना चाहिए, व्यायामशक्ति से बल का परीक्षण करना चाहिए, श्रोत्र इत्यादि का परीक्षण शब्द इत्यादि विषयों के ग्रहण करने से करना चाहिए, इसी प्रकार से हर्ष का परीक्षण आमोद से (प्रसन्नता से) करना चाहिए । उत्सव में तो आमोद होता ही है॥ हर्ष की उत्पत्ति तो उत्सव से होती है, इसलिए जीवन में उत्सव तो अपरिहार्य है ।

**मुदितं हि मनः यदा शब्दादिभिरनुकूलैर्हितकारकैर्विषयैः सह संयुक्तं भवति तदा तेष्वपि प्रीतिमद्भवति, नन्वनुकूलेषु विषयेषु स्वभावादेवप्रीतिर्भवति प्रीतश्च जनःसुखाकाङ्क्षी सन्पुनस्तेषु मनःसंयुज्यते। उत्सवेन तु सर्वदा प्रीतेरभिवर्धनं भवति, यतो ह्युत्सवस्त्वौत्सुक्यं विषयाभिलाष इति यावत्, आमोदस्तु हर्ष एव। हर्षस्तु सत्त्वमूर्जयति (ऊर्जयतीति मनोबलं करोति), तेन हि मनोविकाराणामवसादादीनामपवारणं निवारणञ्च भवति। अत एव ये धार्मिकाः सन्ति ते तु तद्दृष्ट्या विभिन्नानानामुत्सवानामायोजनङ्कुर्वन्ति।**

निश्चित रूप से प्रसन्न मन जब शब्द इत्यादि

अनुकूल हितकारक विषयों के साथ संयुक्त होता है तब उनमें भी प्रीतियुक्त होता है, अनुकूल विषयों में स्वभाव से ही प्रीति होती है और (प्रीतिप्राप्त) प्रसन्न मनुष्य सुख का आकांक्षी होता हुआ पुनः उनमें मन को संयुक्त करता है। उत्सव से तो सर्वदा प्रीति का अभिवर्धन ही होता है क्योंकि उत्सव तो औत्सुक्यअर्थात् विषयों में इच्छा होना यह होता है। आमोद तो हर्ष ही है, हर्ष तो मन को ऊर्जा प्रदान करता है (अर्थात् मनोबल को करता है), इससे निश्चित रूप से अवसाद इत्यादि मनोविकारों का अपवारण (बचाव) और निवारण होता है। इसलिए जो लोग धार्मिक हैं वे तो धार्मिक दृष्टि से विभिन्न उत्सवों का आयोजन करते हैं।

**ये तु नास्तिकाः सन्ति तेष्वप्युत्सवेन सत्त्वोर्जनं तु भवत्येव, अत एवोत्सवेषु तु सर्व एवोत्साहेन सम्मिलिता भवन्ति । यथा ग्रहाम्बुदरजोधूमनीहारैः समावृतमर्कमण्डलमवसन्नं भवति तथैव कामक्रोधलोभमोहेर्ष्यामानमदशोकचित्तोद्वेगभयहर्षादिभिः सत्त्वमवसीदति। उत्सवो हि सत्त्वं प्रेरयति तत्र चानायासेनैव आनृशंस्यसंविभागरुचितातितिक्षासत्यधर्मधृत्यादीनां किञ्चिन्मात्रन्त्वभिवृद्धिर्भवत्येव। आनृशंस्यम्अक्रूरकर्मकारित्वरूपेण ज्ञायते। संविभागरुचिता तु संविभज्य भोक्तुमभिलाषुकतां जानीयात्। तितिक्षा क्षमारूपेण ख्याता। अत्र तु सत्यमिति पदेन भूतहितं तथ्यं वचो वा गृह्णीयात्। धर्मोऽप्यत्र विशिष्टेऽर्थे प्रतिष्ठितः तद्धि कायवाङ्मनोभिः सुचरितम्।**

और जो नास्तिक हैं उनमें भी उत्सव से मन में ऊर्जा तो होती है, इसलिए उत्सव में तो सभी उत्साहपूर्वक सम्मिलित होते हैं। जिस प्रकार से ग्रह, बादल, धूल, धुँआ और ओस इनसे ढका हुआ सूर्य का मण्डल अवसन्न (पीड़ित, उदास, खोया हुआ) होता है उसी प्रकार से काम, क्रोध, लोभ, मोह, ईर्ष्या, मान, मद,शोक, चित्तोद्वेग,भय, हर्ष इत्यादि से मन अवसन्न (दुःखी, उदास) होता है। निश्चित रूप से उत्सव मन को प्रेरित करता है तथा अनायासपूर्वक ही दयालुता, विभाग करके भोग करने की इच्छुकता, क्षमा, सत्य, धर्म, धृति इत्यादि की किंचित् मात्र तो वृद्धि होती ही है। आनृशंस्य जिसमें क्रूर कर्म नहीं किया जाता हो उस रूप (दयालुता) से जानी जाती है,तितिक्षा क्षमा कही गई है, यहाँ तो सत्य इस पद से प्राणियों के हितकारी तथ्य वचन को ग्रहण करना चाहिए, धर्म भी यहाँ विशिष्ट अर्थ में प्रतिष्ठित है और वह है वाणी और मन से सुचरित्र स्वरूप होना।

**भारतीयोत्सवेषु सामान्यतया सर्वेष्वेव धर्मस्य सम्पृक्तता भवत्येव तथा च केषुचिदुत्सवेषु होमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातदेवार्चनादीनामपि च नियतता भवति। तेन हि मनसः संशुद्धिर्भवति सद्विचाराणाञ्चावेशस्तत्र जायते। अत एव धर्मपरायणे जने आनृशंस्यादीनामभिवृद्धिर्विशेषेण भवति। दीपावलिमहोत्सवेन तु धनदेव्याः लक्ष्म्याः सम्बद्धता वर्तते, शरीरयापनार्थन्तु धनमेव प्राथमिकरूपेण पर्येष्टव्यं भवति, आचार्यश्चरकः कथयति यत्–**

सामान्यतया सभी भारतीय उत्सवों में धर्म का जुड़ाव होता ही है और कुछ उत्सवों में होम, नियम, प्रायश्चित्त, उपवास, मंगलकर्म, प्रणाम करना और

देवताओं की पूजा करना इत्यादि की नियतता (निश्चितता) होती है। उससे मन की संशुद्धि होती है और उसमें अच्छे विचारों का समावेश होता है। इसलिए धर्मपरायण व्यक्ति में दयालुता इत्यादि की अभिवृद्धि विशेष रूप से होती है। दीपावली महोत्सव से तो धनदेवी लक्ष्मी की सम्बद्धता है, शरीर के यापन के लिए धन ही प्राथमिक रूप से खोजने योग्य होता है। आचार्य चरक कहते हैं कि-

**प्राणेभ्यो ह्यनन्तरं धनमेव पर्येष्टव्यं भवति; न ह्यतःपापात्पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः, तस्मादुपकरणानि पर्येष्टुं यतेत। तत्रोपकरणोपायाननुव्याख्यास्यामः; तद्यथा- कृषिपाशुपाल्यवाणिज्यराजोपसेवादीनि, यानि चान्यान्यपि सतामविगर्हितानि कर्माणि वृत्ति-पुष्टिकराणि विद्यात्तान्यारभेत कर्तुं; तथा-कुर्वन्दीर्घजीवितं जीवत्यनवमतः पुरुषो भवति। (च.सू.11/5)**

निश्चित रूप से प्राणों के बाद धन ही गवेषणा करने योग्य होता है, निश्चय ही इससे बड़ा कोई पाप से (दुःख से) पापीय(दुःखी) नहीं होता कि उपकरणविहीन (आरोग्य एवं भोग तथा धर्म के साधन धनरहित) व्यक्ति दीर्घायु वाला हो। अतः उपकरणों (धन प्राप्ति के उपायों) की गवेषणा करनी चाहिए। इनमें यहाँ उपकरणसंबंधी उपायों का निर्देश कर रहे हैं,वे जैसे- कृषि, पशुओं का पालन करना, व्यापार करना, राज्य सेवा करना आदि कार्य और अन्य भी आजीविका को पुष्ट करने वाले श्रेष्ठ व्यक्तियों के द्वारा जिनकी निंदा न हो ऐसे कार्यों को करने का विचार करे और उन्हें करना प्रारंभ करे, ऐसे (आजीविका तथा धनसंपत्ति प्रदान करने वाले) कार्यों को करता हुआ व्यक्ति दीर्घ जीवन को जीता है और अत्यन्त श्रेष्ठ (जो तुच्छ न हो ऐसा) पुरुष होता है।

**अत्र हि पापशब्देन पापकार्यं दुःखमुच्यते। उपकरणन्त्वारोग्यभोगधर्मसाधनीभूतो धनप्रपञ्चः अत एव शरीरपरिपालनाय धनन्तु परमाव-श्यकम्, तदर्थं हि दीपोत्सवः। दीपोत्सवे यथा शुद्धः स्थिरः प्रसन्नार्चिर्दीपो दीपाशये भाति तथैव तेनोत्सवेन समुत्पन्नेनामोदात्मकेन हर्षेणोर्जित-ममलं सत्त्वमात्मनि संवृतायने ज्वलति। स्वास्थ्यसंरक्षणार्थं तन्मूलकस्य धनस्य प्राप्त्यर्थं धनस्याधिष्ठात्र्या लक्ष्म्याः प्रीत्यर्थं दीपं प्रज्वालयन् वयं सर्वदा नुमः निवेदयामश्च यत्- 'भो दीप! सुस्थिरो भव'।**

यहाँ पाप शब्द से पाप का कार्य दुःख ही कहा जाता है। उपकरण तो आरोग्य, भोग एवं धर्म इन सब के साधनस्वरूपक धन का प्रपंच है, इसलिए शरीर के परिपालन के लिए धन तो परमावश्यक है, उसी के लिए ही यह दीपोत्सव है, दीपोत्सव में जिस प्रकार से शुद्ध स्थिर और प्रसन्न लौ वाला दीपक दीपाशय में सुशोभित होता है उसी प्रकार से उत्सव से उत्पन्न अमोदस्वरूपक हर्ष से ऊर्जा को प्राप्तमलरहित (स्वच्छ) मन आत्मा से ढके हुए मार्ग में प्रज्वलित होता रहता है। स्वास्थ्य के संरक्षण के लिए उसके मूलस्वरूप धन की प्राप्ति के लिए धन की अधिष्ठात्री लक्ष्मी की प्रसन्नता के लिए दीप को प्रज्वलित करते हुए हम सर्वदा प्रणाम करते हैं और निवेदन करते हैं कि- हे दीप! आप अच्छी प्रकार से स्थिर हों।

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्ष: प्रोफेसर बनवारीलालगौड:, प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम्
दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७९०१४

प्रतिष्ठायाम्,